१०५२-४. अभिञ्ञाय पादकं कारणं **अभिञ्ञापादकं** योगी सतं वापि सहस्सं वापि **यदि** सचे इच्छति, अभिञ्ञापादकं झानं समापज्जित्वा **ततो** अभिञ्ञापादकझानतो **वुट्ठाय** वुट्ठहित्वा ''सतं होमि, सतं होमि'' इति एवं कामावचरपरिकम्ममानसं कत्वा अभिञ्ञाय पादकं कारणभूतं झानं **पुनाधिट्ठाति** पुन आपज्जित्वा ततो झानतो वुट्ठाय पुन अधिट्ठाति, सहाधिट्ठानेन चेतसा अधिट्ठानसङ्खातेन चतुत्थज्झानचित्तेन सह सो योगी सतं होति। इद्धिविधञाणं।

१०६७-८. एसो अधिगताभिञ्ञो योगी **पादकारम्मणेन** चतुत्थज्झानस्स पटिभागनिमित्तसङ्खातेन आरम्मणेन फुट्ठे ओकासे गते पवत्ते पन सद्दे सुणाति। दिब्बसोतञाणं।

१०६९. परस्स चित्तं परियति परिच्छिज्जतीति चेतोपरियं, तमेव मानसं **चेतोपरियमानसं**।

१०७०. हदयं पन निस्सायाति हदयवत्थुं निस्साय पवत्तमानलोहितं, हदयकोसे पवत्तं रुहिरन्ति अत्थो।

१०७५. कामावचरचित्तञ्चाति कामावचरसत्तानं कामावचरचित्तञ्च। **रूपारूपेसु** रूपभवारूपभवेसु सत्तानं मानसञ्च। किं भूतं? सरागादिप्पभेदकं मानसं सब्बं चेतोपरियञाणं जानाति। चेतोपरियञाणं।

१०७७-८२. निसज्जा सब्बपच्छिमाति सब्बेसं इरियापथानं पच्छा जाता निसज्जा भिक्खुना आवज्जितब्बा। **ततो पभुति** ततो सब्बपच्छिमतो निसज्जातो पभुति तं सब्बं पच्छिमनिसज्जं आदिं कत्वा **पटिलोमक्कमा** पटिलोमक्कमेन **सब्बं**

अत्तना कतं आवज्जितब्बं। अस्मिं भवे **याव** यत्तकं कालं **सन्धि** पटिसन्धि होति, **ताव** तत्तकं कालं **कतं** किरियं तेन भिक्खुना आवज्जितब्बं। पुरिमस्मिं भवेपि चुतिक्खणेपि निब्बत्तं नामरूपञ्च साधुकं आवज्जितब्बं। चुतिक्खणे निब्बत्ते तस्मिं नामरूपे एवं भिक्खुना आवज्जितब्बे यदा **तदेव** तमेव नामरूपं आरम्मणं कत्वा चुतिक्खणे मनोद्वारे **मनक्कारो** मनोद्वारावज्जनचित्तं उप्पज्जति। पुब्बेनिवासानुस्सतिञाणं।

१०८६-९६. अभिञ्ञापादकं कसिणारम्मणं झानं अभिनीहारक्खमं कत्वा इमेसु तीसु कसिणेसु कतपुञ्ञेहि। **तस्मा तमितरं वापी**ति आलोककसिणं वा इतरं वापि कसिणद्वयं यथाक्कमं उप्पादेत्वा उपचारभूमियंयेव ठत्वा **तं** आलोककसिणं ठपेतब्बं। अप्पनं पण्डितो न उप्पादेय्य, सचे उप्पादेति, **तं** आलोककसिणं **पादकज्झाननिस्सितं** पादकज्झानस्स आरम्मणं होति। वड्ढितस्स झानस्स अन्तोगधं रूपं तेन योगिना पस्सितब्बं **भवे** भवेय्य। तं रूपं **पस्सतो** पस्सन्तस्स **तस्स** योगिनो परिकम्मस्स वारो अतिक्कमति, **तावदे** तस्मिंयेव खणे आलोकोपि **तस्स** योगिनो आलोकोपि खिप्पं अन्तरधायति। **तस्मिं** आलोके अन्तरहिते **रूपगतं** रूपं न दिस्सति। दिवसम्पि निसीदित्वा पस्सतो रूपदस्सनं होति।

११००-१. **तंचित्तसंयुत**न्ति तेन चतुत्थज्झानेन युत्तं चित्तं। अनागतंसञाणस्स परिकम्मं, यथाकम्मूपगस्स ञाणस्स च परिकम्मं। दिब्बचक्खुञाणं।

११०३. यो भिक्खु **इध** इमस्मिं सासने इमं पन गन्थं सुणाति, चित्ते करोति च, सो भिक्खु **अनेन तरेन** इमिना गन्थेन तरित्वा अभिधम्ममहण्णवपारं **याति** पापुणाति, जानातीति अत्थो।

इति अभिधम्मावतारटीकाय

अभिञ्ञानिद्देसवण्णना निट्ठिता।

सोळसमो परिच्छेदो।

१७. सत्तरसमो परिच्छेदो

अभिञ्ञारम्मणनिद्देसवण्णना

११०४. **अनागतंसञाणञ्चा**ति न आगतो अनागतो, न ताव सम्पत्तोति अत्थो, अनागते अंसा कोट्ठासा तेसं ञाणं अनागतंसञाणं। यं यं कम्मं यथाकम्मं, तं उपगच्छति जानातीति **यथाकम्मुपगं,** विपाकचेतनाजाननकञाणं।

११०७-९. **तत्थ** तेसु आरम्मणत्तिकेसु। **चित्तसन्निस्सितं कत्वा**ति तं कायं चित्तं सन्निस्सितं करित्वा तमेव कायचित्तचेतसिकवसेन महग्गते चित्तस्मिं समारोपेति ञाणं इद्धिविधञाणं, ततो कायारम्मणतो कायस्स परित्तत्ता कामावचरत्ता परित्तारम्मणं ञाणं सिया।

१११०-३. **दिस्समानेन कायेन, गन्तुकामो यदा भवे** यो योगी दिस्समानेन कायेन गन्तुकामो यदा भवेय्य, सो योगी तदा चित्तं **कायसन्निस्सितं कत्वा** रूपकाये सन्निस्सितं कत्वा तं पादकज्झानचित्तं कायवसेन काये आरोपेति, तदा झानारम्मणतो तं ञाणं महग्गतगोचरं होति, यं ञाणं यदा **अनागतञ्च** धम्मजातं, **अतीतञ्च** धम्मजातं **विसयं** आरम्मणं

करोति, तदा तं ञाणं अतीतारम्मणं होति, तदा अनागतारम्मणं आरम्मणकरणकाले अनागतगोचरं होति। दिस्समानेन कायेन तस्स भिक्खुनो गमने पन सति **तस्स** योगिनो ञाणस्स गोचरो पच्चुप्पन्नो नाम होति, इति विनिद्दिसे।

१११४. कायं चित्तस्स वसेन चित्ते आरोपेति, चित्तं कायस्स वसेन काये आरोपेति, इति परिणामनकालस्मिं तस्स योगिनो ञाणं अज्झत्तारम्मणं सिया। **सम्पवत्तति सत्तसू**ति
परित्तमहग्गतअतीतअनागतपच्चुप्पन्नअज्झत्तबहिद्धारम्मणसङ्खातेसु **सत्तसु** आरम्मणेसु सम्पवत्तति।

११२०. **जानने मज्झिमान**न्ति महग्गतानं जानने।

११२२. **एतस्स** चेतोपरियञाणस्स मग्गारम्मणता परियायेन एव **मता** ञाता।

११२६-७. **तत्थ तिक्खणसम्पत्तं, पच्चुप्पन्नं खणादिकं**।

तत्थ तेसु पच्चुप्पन्नेसु यं पच्चुप्पन्नं खणादिकं **तिक्खणसम्पत्तं** उप्पादट्ठितिभङ्गक्खणसम्पत्तं **खणादिकं** खणायेव तं खणावयवं पच्चुप्पन्नं नाम। **एकद्वेसन्ततिवारपरियापन्न**न्ति एकचित्तद्विचित्तवीथिवारपरियापन्नं सन्ततिपच्चुप्पन्नं नाम। **पच्चुप्पन्नन्ति पच्छिम**न्ति अद्धापच्चुप्पन्नन्ति अत्थो।

११३१-२. येन आवज्जनचित्तेन धम्मे आवज्जति, येन चेतसा जानाति, **तेसं** द्विन्नं आवज्जनजवनचित्तानं सहट्ठानस्स अभावा **तं** ''खणादिकत्तयं पच्चुप्पन्न''न्तिआदिकं ''एकस्स चित्तमेकेन, अवस्सं पन विज्झति''इति परियोसानं वचनं न युज्जति। आवज्जनजवनानं नानारम्मणभावं पत्तितो आपज्जनतो च न युज्जति। **अनिट्ठे पन ठाने** तेसं आवज्जनजवनानं एकारम्मणभावे अनिच्छिते तस्मिं ठाने न युज्जति, अञ्ञस्मिं पन ठाने मग्गवीथियं आवज्जनपरिकम्मजवनानं कसिणादिकं आरम्मणं होति, गोत्रभुलोकुत्तरचित्तानञ्च निब्बानं आरम्मणं होति, एत्थ आरम्मणजवनानं एकारम्मणता अनिच्छता।

११३४-४१. ''एकब्भवपरिच्छिन्नं, पच्चुप्पन्नन्ति पच्छिम''न्ति वत्वा पुन अञ्ञेन परियायेन तं पच्चुप्पन्नं दस्सेतुं इदं **अद्धाख्यं** अद्धानाम पच्चुप्पन्नं जवनवारतो दीपेतब्बं। **इति** वचनं निद्दिट्ठं। यदा **इद्धिमा** योगी परस्स चित्तं ञातुं आवज्जति, तस्स आवज्जनमनो **पच्चुप्पन्नखणव्हयं** पच्चुप्पन्नं मनोद्वारावज्जनचित्तं आरम्मणं कत्वा **तेन** चित्तेन सद्धिं निरुज्झति, तेसु निरुद्धेसु तस्स योगिनो चत्तारि, पञ्च वा जवनानि जायन्ति। **एतेसं** चतुन्नं, पञ्चन्नं जवनानं यं पच्छिमं चित्तं इद्धिचित्तमुदीरितं। इद्धिचित्ततो **सेसानि** कामावचरचित्तानि। **एतेसं** कामावचरे इद्धिजवनानं तदेव च परचित्तं आरम्मणं होति यस्मा, **तस्मा सब्बानि तानि** जवनानि एकारम्मणतं यन्ति, तेसं जवनानं नानारम्मणता अद्धावसा न भवेय्य, पच्चुप्पन्नारम्मणतो तेसं जवनानं एकारम्मणभावेपि इद्धिमानसमेव च परस्स चित्तं जानाति। **इतरानि** कामावचरानि पन चित्तानि परस्स चित्तं न जानन्ति। **यथा चक्खुद्वारे तु विञ्ञाण**न्ति चक्खुविञ्ञाणं रूपं पस्सति, तथा इतरं चित्तं न पस्सति।

११६१. **अनागतंसञाणस्सा**ति अनागतंसञाणस्स अनागतं धम्मं अगोचरं, गोचरं न होतियेवाति अत्थो।

११६९. विविधत्थानि वण्णपदानि यस्मिं सो **विविधत्थवण्णपदो,** तं मधुरत्थमतिनीहरं उत्तमं सोतुजनस्स हदयं पीतिकरं सचेतनो को नाम मनुजो न सुणेय्य।

इति अभिधम्मावतारटीकाय

अभिञ्ञारम्मणनिद्देसवण्णना निट्ठिता।

सत्तरसमो परिच्छेदो।

१८. अट्ठारसमो परिच्छेदो

दिट्ठिविसुद्धिनिद्देसवण्णना

११७५. **या सञ्जाननमत्तंव, सञ्ञा नीलादितो पना**ति सा सञ्ञा नीलादिवसेन सञ्जाननमत्तंव करोति। **लक्खणप्पटिवेध**न्ति अनिच्चादिलक्खणपटिबुज्झनं।

११७७. **तं** विञ्ञाणं **उस्सक्कित्वा** उद्धं सक्कं कत्वा सत्ते मग्गं पापेतुं न सक्कोति।

११७८-९. सब्बेसं पन धम्मानं **सभावपटिवेधनं** अविपरीतवसेन पटिबुज्झनं पञ्ञाय लक्खणं।

११८०. समाधि आसन्नकारणं एतायाति **समाधासन्नकारणा**।

११८१. **लक्खणेनेकधा**ति सब्बधम्मं पटिबुज्झनलक्खणेन पञ्ञाव एकधा वुत्ता।

११८३. **भूरिपञ्ञेना**ति भूते अत्थे अविपरीते अत्थे रमतीति भूरि, भूरि पञ्ञा एतस्साति भूरिपञ्ञो, तेन।

११८६-९१. तीसु अत्थधम्मनिरुत्तीसु च ञाणेसु अत्थधम्मनिरुत्तीसु जातेसु ञाणेसु च ञाणं। यं किञ्चि पच्चयुप्पन्नं फलं धम्मजातं। **भासितत्थो**ति पाळिया अत्थो। **एते पञ्च** धम्मा **अत्थसञ्ञिता** अत्थनामका। **फलनिब्बत्तको हेतू**ति जननको पच्चयो। **भासित**न्ति पाळि। **धम्मसञ्ञिता**ति धम्मनामका। **सभावनिरुत्ती**ति अविपरीतवोहारो। **परियत्ती**ति सिक्खनं। सवनाधिगमेहि **पुब्बयोगेन** पुब्बे पवत्तनाय।

११९२. **भूमिभूतेसू**ति विपस्सनाय भूमिभूतेसु।

११९४. **जननादितो**ति जातिआदितो भीतेन पञ्ञा भावेतब्बा।

१२०३. **एकासीतिया चित्तेना**ति लोकुत्तरचित्तवज्जितेन विपस्सनाभूमिभूतेन एकासीतिया चित्तेन।

१२०८. **सत्तसम्मोहघातत्थ**न्ति सत्तोति सम्मोहस्स विनासितत्थं।

१२११. **निरीहक**न्ति ईहविरहितं ब्यापारविरहितं, दारुरज्जुसमायोगे।

१२१५. **उभो भिज्जन्ति पच्चया**ति अञ्ञमञ्ञपच्चयकारणा।

१२२५. अन्तद्वयन्ति कामसुखल्लिकानुयोगअत्तकिलमथानुयोगद्वयं। **भावये**ति दिट्ठिविसुद्धिं वड्ढेय्य।

इति अभिधम्मावतारटीकाय

दिट्ठिविसुद्धिनिद्देसवण्णना निट्ठिता।

अट्ठारसमो परिच्छेदो।

१९. एकूनवीसतिमो परिच्छेदो

कङ्खावितरणविसुद्धिनिद्देसवण्णना

१२३१. इच्चेवमादिबात्तिंसकोट्ठासानं पच्चयस्स हेतुपच्चये ताव योगी मनसा परिग्गण्हाति।

१२३३. हेत्वङ्कुरस्स बीजं तु बीजं अङ्कुरस्स हेतुजनकं, पथवादयो अङ्कुरस्स पच्चया।

१२३४. पञ्च धम्माति अविज्जातण्हुपादानकम्माहारा हेतुपच्चया धम्मा।

१२३५. कम्मं पुत्तस्स जनको पिता विय नामरूपस्स जनकं।

१२३८. पच्चयाति पच्चयेन।

१२४०. या साति या सा कङ्खा। **पुब्बन्ते** पुब्बकोट्ठासे।

१२४१. सब्बथा सब्बकोट्ठासतो अनवसेसाव तस्स योगिनो **सा** कङ्खा **पहिय्यति** नासीयते।

१२४३. अत्थसाधिकाति कुसलपक्खे दानादिअत्थसाधिका, अकुसलपक्खे पाणातिपातादिअत्थसाधिका।

तं विपाकन्ति उपघातककम्मस्स तं विपाकं उप्पन्नं नाम होति। एवं एको योगी कम्मविपाकवसेन नामरूपस्स पच्चयपरिग्गहं करोति।

१२४६. हेतुफलस्स सम्बन्धवसेनाति हेतुफलसम्बन्धवसेन इदं नामरूपं **केवलं** एकन्तेन पवत्तति, इति **सम्मा** अविपरीताकारेन सं अनुपस्सति।

१२४७. पाकप्पवत्तितो उद्धं पाकपटिवेदकं **न पस्सति** न जानियते।

१२५०-१. अप्पवत्ति नाम **न दिस्सति,** उपपन्नं दिस्सति। तित्थिया एतमत्थं **अनञ्ञाय** अजानित्वा **असयंवसी सत्तसञ्ञ**न्ति ''सत्तो''ति सञ्ञं गहेत्वान सस्सतउच्छेददस्सिनो अञ्ञमञ्ञं विरोधिनो हुत्वा द्वासट्ठिदिट्ठिं गण्हन्ति।

१२५४. उभोति उभो कम्मविपाका अञ्ञमञ्ञतो सुञ्ञा। **न च कम्मं विना फल**न्ति कम्मं विना फलं न च होति।

१२५५. **सम्भारेही**ति सूरियादिसम्भारेहि।

१२५७. सुञ्ञं **तं** नामरूपधम्मं।

१२५८. **हेतुसम्भारपच्चया**ति हेतुना च सम्भारपच्चयेहि च।

इति अभिधम्मावतारटीकाय

कङ्खावितरणविसुद्धिनिद्देसवण्णना निट्ठिता।

एकूनवीसतिमो परिच्छेदो।

२०. वीसतिमो परिच्छेदो

मग्गामग्गञाणदस्सनविसुद्धिनिद्देसवण्णना

१२६४. **पच्चुप्पन्नस्स धम्मस्सा**ति पच्चुप्पन्नस्स नामरूपधम्मस्स।

१२६६-८. **उप्पज्जतो** उप्पज्जन्तस्स नामरूपधम्मस्स **रासितो** निचयतो आगमनञ्च नत्थि। **दिसागमन**न्ति दिसाय गमनं। **निरुद्धस्सापि** नामरूपधम्मस्स एकस्मिं ठाने निचयोति च नत्थि।

१२७०-१. अविज्जासमुदया रूपसमुदयो, अविज्जानिरोधा रूपनिरोधो। तण्हासमुदया रूपसमुदयो, तण्हानिरोधा रूपनिरोधो। कम्मसमुदया रूपसमुदयो, कम्मनिरोधा रूपनिरोधो। आहारनिरोधा रूपनिरोधो। **धम्मे**ति सङ्खारधम्मे।

१२८०. **सम्पत्तपटिवेधस्सा**ति सम्पत्तलोकुत्तरसङ्खातमग्गफलस्स सोतापन्नादिपुग्गलस्स। **विप्पटिपन्नस्सा**ति पटिपत्तियं अप्पटिपन्नस्स, विरुद्धवसेन पटिपन्नस्स वा।

१२८६. **कायचित्तानी**ति **काया**ति वेदनासञ्ञासङ्खारा। **चित्त**न्ति विञ्ञाणं।

१२९०. **यतो यतो** पच्चयादितो। यं **अमतं** निब्बानं **विजानतं** विजानन्तानं पीतिपामोज्जं, तेहि लभितब्बं अमतं, अमतं विय पीतिपामोज्जं वा।

१२९३. **अप्पत्ते**ति अत्तनि मग्गफलस्मिं अप्पत्ते। **पत्तसञ्ञी**ति मग्गफले अहं पत्तो अस्मि इति सञ्ञितो होति।

१२९७. **सारवेदिनो**ति सारजाननसीला। **त**न्ति तं मग्गामग्गञाणदस्सनं। **इदं** ञाणं **मग्गामग्गञाणदस्सनन्ति** मग्गामग्गञाणदस्सनं नाम।

इति अभिधम्मावतारटीकाय

मग्गामग्गञाणदस्सनविसुद्धिनिद्देसवण्णना निट्ठिता।

वीसतिमो परिच्छेदो।

२१. एकवीसतिमो परिच्छेदो

पटिपदाञाणदस्सनविसुद्धिनिद्देसवण्णना

१२९९. **उपल्लेसविमुत्तं सुविसदं ञाण**न्ति अट्ठविधञाणं सन्धायाह।

१३०२. सच्चानुलोमञाणन्ति अयमेव पवुच्चति।

१३०६. अयं सिखापत्ता विपस्सना एव सच्चानुलोमञाणं नाम पवुच्चति।

१३०९. **भवङ्गानन्तरं सङ्खारु-पेक्खागतनयेना**ति भवङ्गानन्तरं सङ्खारुपेक्खासङ्खातेन ञाणेन कतनयेन।

१३१४-६. **बोधिपक्खियधम्मानं**, **उद्धञ्च अनुलोमतो**ति उद्धं वत्तमानानं बोधिपक्खियधम्मानं अनुलोमतो, **इदं** अनुलोमञाणं वुट्ठानगामिनिया परियोसानं नाम **भासितं** महेसिना कथितं। सच्चानुलोमञाणं आहच्च उप्पन्ना, सब्बप्पकारेन गोत्रभुपरियोसानं।

१३१८. **तत्था**ति विपस्सनाय।

इति अभिधम्मावतारटीकाय

पटिपदाञाणदस्सनविसुद्धिनिद्देसवण्णना निट्ठिता।

एकवीसतिमो परिच्छेदो।

२२. द्वावीसतिमो परिच्छेदो

ञाणदस्सनविसुद्धिनिद्देसवण्णना

१३१९-२२. आवज्जनस्स हितं आवज्जनियं, तं ठानं एतस्साति आवज्जनियठानं, गोत्रभूति अत्थो। तं गोत्रभुचित्तं मग्गचित्तस्स **आवज्जनियठानत्ता**। पटिपदाञाणदस्सनं कुदाचनं न च भजति, तथेव ञाणदस्सनविसुद्धिं कुदाचनं न भजतेव। **उभिन्नं** ञाणानं अन्तरा एकं **अब्बोहारिकं** वोहारे नियुत्तन्ति वोहारिकं, न वोहारिकं अब्बोहारिकं। विपस्सनाय सोतस्मिं विपस्सनाय सोते पतितत्ता विपस्सना नाम वोहरितब्बा। **ततो** निब्बानतो।

१३२५. **सूरं तिक्खं विपस्सन**न्ति गोत्रभुचित्तं सन्धायाह।

१३२६-९. विसङ्खारन्ति सङ्खारेहि विगतं। **पठमावज्जनञ्चेवा**ति पठमावज्जनं विय। **पठमाभोगतापि चा**ति पठममनसिकारा विय। मग्गस्स अनन्तरादीहि पच्चयेहि। **तस्सा**ति मग्गस्स। सिखापत्ताय ताय विपस्सनाय **मुद्धम्हि** मत्थके। **अनावत्त**न्ति अनिवत्तं।

१३३०-३. एकेन आवज्जनेन एकिस्सायेव वीथिया। **अनुलोमगोत्रभुचेतस**न्ति अनुलोमगोत्रभुचित्तानं नानारम्मणता वुत्ता। **तं** गोत्रभुचित्तं अनावज्जनम्पि मग्गस्स आवज्जनट्ठाने ठत्वा। **सञ्ञं दत्वा विया**ति ''अहं निब्बानं आरम्मणं करोमि, त्वम्पि तमेवारम्मणं करोहि'' इति सञ्ञं दत्वा वियाति अधिप्पायो। **सञ्ञित**न्ति सञ्ञं। **कदाचिपि अनिब्बिद्धपुब्बं मग्गो एस** एसो मग्गो पुब्बे अनिब्बिद्धपुब्बो।

१३३६. **उज्झती**ति छिन्दति।

१३३८. अनेकेसं आनिसंसानं दायकेन आदिमग्गेन संयुत्तं। पठममग्गञाणं।

१३४१. **एकस्सासेवनं नत्थि** एकस्स चित्तुप्पादस्स आसेवनपच्चयो नत्थि, **तस्मा** कारणा **द्वे** चित्तुप्पादा अनुलोमका। **तेही**ति चित्तुप्पादेहि आसेवनपच्चयं **लद्धा** लभित्वा **ततियं** चित्तं गोत्रभु होति।

१३४५-७. मग्गपेक्खनहेतु यस्स आवज्जनमनसो, तं **मग्गपेक्खनहेतुकं**। **तस्मिं निरुद्धे**ति तस्मिं आवज्जनचित्ते निरुद्धे मग्गस्स पच्चवेक्खणसञ्ञितानि सत्त जवनानि पटिपाटिया जायन्ते। पच्चवेक्खणञाणानि एकूनवीसति होन्ति।

१३५१. **ततो** तदा विपस्सनावीथिं ओतरति। दुतियमग्गञाणं।

१३६१. **मूलघात**न्ति मूलघातनं। ततियमग्गञाणं।

१३६३. **अनावत्तिसभावतो**ति अनिवत्ततो। चतुत्थमग्गञाणं।

इति अभिधम्मावतारटीकाय

ञाणदस्सनविसुद्धिनिद्देसवण्णना निट्ठिता।

द्वावीसतिमो परिच्छेदो।

२३. तेवीसतिमो परिच्छेदो

किलेसपहाननिद्देसवण्णना

१३७५. **इध पन** इमस्मिं पनाधिकारे **कारणूपचारेन** लाभादिकारणस्स वोहारेन, लाभो आदि वत्थु यस्स अनुनयस्साति **लाभादिवत्थुको,** तस्स।

सुखुमाति कामरागपटिघा सुखुमा।

१३७६. येन येन पठममग्गादिञाणेन **यो यो** संयोजनादिको पहातब्बो **धम्मो घातं** विनासं याति, **सो सो** धम्मो **तेन तेन असेसेन** ञाणेन एवं साधु मया सन्दस्सितो।

१३८३. परिञ्ञाभिसमयेनाति परिच्छिन्दित्वा जाननेन। **दुक्खं अभिसमेती**ति दुक्खं पटिविज्झति।

१३९४. यो योगी **इमं विदित्वा हितभावनं वनं** वनेतब्बं **विदित्वा** जानित्वा **वे** एकन्तेन सुखसंहितं हितं उपेति, चित्तस्स तमं **अनुत्तमं** हीनं **विधूय** विनासेत्वा **अविग्गहकम्पदं पदं** अविग्गहकं सरीररहितं पदं पटिपज्जितब्बं ञातब्बं **पदं** निब्बानं **उपेति** पापुणाति च।

इति अभिधम्मावतारटीकाय

किलेसपहाननिद्देसवण्णना निट्ठिता।

तेवीसतिमो परिच्छेदो।

२४. चतुवीसतिमो परिच्छेदो

पच्चयनिद्देसवण्णना

१३९५. रूपं रूपस्साति रूपं रूपस्स। **अरूपस्स** नामस्स।

१३९६. मिस्सकस्साति नामरूपमिस्सकस्साति अत्थो।

१३९७. तिपञ्च चाति पन्नरस च।

१३९९. एकोति कम्मपच्चयो। **द्वेकालिको**ति अतीतपच्चुप्पन्नकालवसेन द्वीसु कालेसु नियुत्तो। **दस्सितो**ति भगवता देसितो।

इति अभिधम्मावतारटीकाय

पच्चयनिद्देसवण्णना निट्ठिता।

चतुवीसतिमो परिच्छेदो।

निगमनकथावण्णना

१४०१. सुमतिमतिविचारबोधनोति सुमतीनं सुन्दरपञ्ञानं कवीनं मतिया विचारस्स बोधनो। **विमतिविमोहविनासनो**ति विमतीनं बालानं विमोहस्स विनासनो। **कुमतिमतिमहातमोनासो**ति कुमतीनं बालानं महातमसन्निभाय मतिया नासको। **पटुमतिभासकरो**ति पटूनं पण्डितानं तिक्खपञ्ञाय ओभासकरो।

१४०२. सुमतिनामको भिक्खु **असमानतो** असदिसाय पूजाय मम आयाचितो **यतो** यस्मा कारणा, **ततो** तस्मा कारणा अयं अभिधम्मावतारो। **पदातो पदा**ति कोट्ठासतो कोट्ठासतो। **हितविभावना भावना**ति हितप्पकासनाय भावनाय मया रचितो। अथ वा अहं सुमतिना भिक्खुना असमानतो मानतो आयाचितो **यतो** यस्मा, **ततो** तस्मा।

१४०५. तिविधा ब्यप्पथानञ्हि गतियोति ब्यप्पथानं वचनानं अत्थगन्थयुत्तिवसेन तिविधा गतियो।

१४०६. निकायन्तरलद्धीहीति अञ्ञस्मिं निकाये लद्धीहि। **वाचनामग्गनिस्सितो**ति वचनप्पबन्धनिस्सितो।

१४१०. असंकिण्णकुलाकुलेति असम्मिस्सकुलेहि आकिण्णे। **सुपसन्नसितोदके**ति मधुरसीतोदके।

१४११. सङ्कटेति सम्बाधे।

१४१२. केलाससिखराकारपासादपटिमण्डितेति रजतपब्बतमत्थकनिभेहि पासादेहि अलङ्कते।

१४१३. विविधाकारचारुपाकारगोपुरेति विविधसण्ठानमनुञ्ञपाकारद्वारकोट्ठके।

१४१४. सल्लेखाति सल्लेखवुत्ति। **साखल्ये**ति सखिलभावे। **सता**ति सतिसम्पन्नेन।

१४१५. वस्सवलाहका देवाति वस्सवलाहकभूता देवा अमरा।

निगमनकथावण्णना निट्ठिता।

अभिधम्मावतारपुराणटीका निट्ठिता।

॥ नमो तस्स भगवतो अरहतो सम्मासम्बुद्धस्स॥

अभिधम्मावतार-अभिनवटीका

(पठमो भागो)

गन्थारम्भकथा

(क) विसुद्धकरुणाञाणं, बुद्धं सम्बुद्धपूजितं।
धम्मं सद्धम्मसम्भूतं, वन्दे संघं निरङ्गणं॥

(ख) **सारिपुत्तं** महाथेरं, परियत्तिविसारदं।
नमामि सन्तवुत्तिं मे, गुरुं गारवभाजनं॥

(ग) वन्दन्तेन मया एवं,

या लद्धा पुञ्ञसम्पदा।
हित्वा तस्सानुभावेन,
अन्तराये असेसतो॥

(घ) महाविहारवासीनं, थेरानं थिरसीलिनं।
वंसालङ्कारभूतेन, भूतानुग्गहकारिना॥

(ङ) थेरेन **बुद्धदत्तेन,** रचितं यं मनोरमं।
पिटके अभिधम्मस्मिं, ओतारुपायभावतो॥

(च) **अभिधम्मावतारो**ति, लद्धनामेन विस्सुतं।
नानानिपुणगम्भीरनयं पकरणुत्तमं॥

(छ) अत्थसंवण्णनं तस्स, आरभिस्सं यथाबलं।
पामोज्जजननत्थाय, आभिधम्मिकभिक्खुनन्ति॥

गन्थारम्भकथावण्णना

१. परमनिपुणविचित्तनयसमन्नागतं सकसमयसमयन्तरगहनविग्गाहणसमत्थं सुविमलविपुलपञ्ञावेय्यत्तियजननं पकरणमिदमारभन्तोयमाचरियो पठमं ताव रतनत्तयप्पणामकरणेन अन्तरायनिवारणञ्चेव पञ्ञापाटवञ्च पत्थेति। रतनत्तयप्पणामो हि अत्थतो पणामकिरियाभिनिप्फादिका कुसलचेतना। सा च वन्दनेय्यवन्दकानं खेत्तज्झासयसम्पदाहि दिट्ठधम्मवेदनीयभूता यथालद्धसम्पत्तिनिमित्तकस्स कम्मस्स अनुबलप्पदानवसेन तन्निब्बत्तितविपाकसन्ततिया अन्तरायकरानि उपपीळकउपच्छेदककम्मानि पटिबाहित्वा तन्निदानानं यथाधिप्पेतसिद्धिविबन्धकानं रोगादिअन्तरायानमप्पवत्तिं साधेति, रागादिमलविक्खालनेन च चित्तसन्तानं परिसोधेत्वा तन्निस्सिताय पञ्ञाय यथाधिप्पेतसिद्धिसम्पादकं तिक्खविसदभावमावहति। किञ्चि आचिण्णमेतं पण्डितानं, यदिदं गन्थसमारम्भे रतनत्तयप्पणामकरणं, तस्मा सप्पुरिसाचारानुरक्खणत्थञ्च आदिम्हि रतनत्तयवन्दना आरद्धाति एवमादिना अञ्ञानिपि बहूनि पयोजनानि निद्धारेतब्बानि। तानि पन तत्थ तत्थ बहुधा वित्थारितानीति तं पपञ्चपरिस्समं ठपेत्वा यथानुप्पत्तमेव ताव वण्णयिस्साम।

एत्थ च रतनत्तयप्पणामं कत्तुकामो तथागतमूलकत्ता सेसरतनानं पठमं ताव तथागतस्स थोमनापुब्बङ्गमं पणाममारभन्तो आह ‘‘**अनन्तकरुणापञ्ञ**’’न्तिआदि। थोमनापुब्बङ्गमेन हि पणामेन सत्थु गुणातिसययोगो, ततो चस्स अनुत्तरवन्दनीयभावो, तेन च अत्तनो वन्दनाय खेत्तङ्गतभावो, खेत्तङ्गताय च वन्दनाय यथाधिप्पेतनिप्फत्तिया हेतुभावो च दस्सितो होति।

तत्थ **वन्दित्वा**ति पुब्बकालकिरियानिद्देसो। तस्स पन ओसानगाथायं ‘‘पवक्खामी’’ति इमिना अपरकालकिरियावचनेन सह सम्बन्धो। **बुद्ध**न्ति वन्दनकिरियाय कम्मनिद्देसो। ‘‘**अनन्तकरुणापञ्ञ**’’न्तिआदिकं पन तब्बिसेसनं। तत्थ किरतीति करुणा, परदुक्खं विक्खिपति अपनेतीति अत्थो। किरीयति दुक्खितेसु पसारीयतीति वा

करुणा। अथ वा करोतीति करुणा, परदुक्खे सति साधूनं कम्पनं हदयखेदं जनयतीति अत्थो। किणातीति वा करुणा, परस्स दुक्खं पच्चयवेकल्लकरणतो हिंसतीति अत्थो। पजानातीति पञ्ञा, यथासभावं पकारेहि पटिविज्झतीति अत्थो। करुणा च पञ्ञा च करुणापञ्ञा, नत्थि एतासं अन्तोति अनन्ता, अनन्ता करुणापञ्ञा एतस्साति अनन्तकरुणापञ्ञो, तं **अनन्तकरुणापञ्ञं**।

एत्थ च उप्पादवयन्ततावसेन चेव सन्ततिपरियोसानवसेन च सतिपि भगवतो करुणापञ्ञानं सपरियन्तभावे अनन्तारम्मणेसु पवत्तनतो अनन्तता वेदितब्बा। सम्मासम्बुद्धस्स हि सब्बसत्तानं दुक्खापनयनाकारप्पवत्ता अनञ्ञसाधारणा महाकरुणा कञ्चि सत्तं अवज्जेत्वा सब्बेसु सत्तेसु निरवसेसेन पवत्तति, तथा सब्बधम्मसभावबोधनसमत्था सब्बञ्ञुतञ्ञाणसङ्खाता पञ्ञापि सकलञेय्यधम्मेसु अनवसेसतो पवत्तति, तस्मा अनन्तारम्मणप्पवत्तकरुणाञाणवन्तताय अनन्तकरुणापञ्ञो भगवा। करुणापञ्ञाग्गहणेन चेत्थ भगवतो सब्बलोकियलोकुत्तरगुणसम्पत्ति दस्सिता होति। तथा हि करुणाग्गहणेन लोकियेसु महग्गतभावप्पत्तासाधारणगुणदीपनतो सकललोकियगुणसम्पत्ति दस्सिता, पञ्ञाग्गहणेन सब्बञ्ञुतञ्ञाणपदट्ठानमग्गञाणदीपनतो सब्बलोकुत्तरगुणसम्पत्ति दस्सितताति।

अपिच सब्बबुद्धगुणानं करुणा आदि, पञ्ञा परियोसानं। महाकरुणासञ्चोदितमानसो हि भगवा संसारपङ्कतो सत्तानं समुद्धरणत्थाय कताभिनीहारो अनुपुब्बेन पारमियो पूरेत्वा अनुत्तरसम्मासम्बोधिया अधिगमेन सकलबुद्धगुणे पटिलभि। इति सकलबुद्धगुणानं तन्निदानभावतो करुणा सब्बबुद्धगुणानमादि, सब्बञ्ञुतञ्ञाणपदट्ठानस्स पन मग्गञाणस्स पटिलभनतो उत्तरिकरणीयाभावतो पञ्ञा परियोसानं। आदिपरियोसानदस्सनेन च सकलबुद्धगुणा नयतो दस्सिता होन्ति। नयग्गाहो एव हि सब्बबुद्धगुणानं दस्सनुपायो, इतरथा तादिसस्स सब्बञ्ञुबुद्धस्सपि वचनपथातीतं तथागतगुणं अनुपदं वण्णेन्तो को नाम परियोसानमाहरितुं सक्कुणेय्याति।

एवं करुणापञ्ञामुखेन सङ्खेपतो सकलबुद्धगुणेहि भगवन्तं थोमेत्वापि पुन अत्तनो बुद्धगुणसंकित्तने अतित्ताभावेन चेव परेसञ्च पसादबाहुल्लजननत्थं तदन्तोगधेपि विसिट्ठगुणे पधानभावेन नीहरित्वा दस्सेन्तो आह ''**तथागत**''न्तिआदि। तत्थ ''**तथागत**''न्ति तथा आगततादीहि अट्ठहि कारणेहि तथागतं। वुत्तञ्हेतं (दी॰ नि॰ अट्ठ॰ १.७; म॰ नि॰ अट्ठ॰ १.१२; बु॰ वं॰ अट्ठ॰ १.२ निदानकथा; अ॰ नि॰ अट्ठ॰ १.१.१७०) –

> ''अट्ठहि कारणेहि भगवा तथागतो, तथा आगतोति तथागतो, तथा गतोति तथागतो, तथलक्खणं आगतोति तथागतो, तथधम्मे याथावतो अभिसम्बुद्धोति तथागतो, तथदस्सिताय तथागतो, तथवादिताय तथागतो, तथाकारिताय तथागतो, अभिभवनट्ठेन तथागतो''ति।
>
> ''कथं भगवा **तथा आगतोति तथागतो**? यथा सब्बलोकहिताय उस्सुक्कमापन्ना पुरिमका सम्मासम्बुद्धा आगता, किं वुत्तं होति? मनुस्सत्तादिअट्ठङ्गसमन्नागतेन येन अभिनीहारेन ते भगवन्तो आगता, तेनेव च अभिनीहारेन अयम्पि भगवा आगतो, यथा च ते भगवन्तो समतिंस पारमियो पूरेत्वा पञ्चमहापरिच्चागादीनि सम्पादेत्वा आगता, यथा च ते सत्ततिंस बोधिपक्खियधम्मे भावेत्वा ब्रूहेत्वा आगता, तथा अयम्पि भगवा आगतोति एवं ताव तथा आगतो''ति तथागतो। (१)
>
> ''कथं **तथा गतोति तथागतो**? यथा सम्पतिजाता ते भगवन्तो सत्तपदवीतिहारेन गता, यथा वा ते

समथविपस्सनामग्गेहि तं तं अकुसलपक्खं विधमित्वा गता, तथा अयम्पि भगवा गतो, एवं तथा गतोति तथागतो। (२)

''कथं **तथलक्खणं आगतोति तथागतो**? यस्मा तेसं तेसं धम्मानं यं सभावसरसलक्खणं तथं अवितथं, तञ्चेस तथलक्खणं आगतो याथावतो अधिगतो, तस्मा तथलक्खणं आगतोति तथागतो गमनत्थानं बुज्झनत्थसम्भवतो। तथा हि वदन्ति 'ये गतिअत्था, ते बुज्झनत्था। ये बुज्झनत्था, ते गतिअत्था'ति। (३)

''कथं **तथधम्मे याथावतो अभिसम्बुद्धोति तथागतो**? यस्मा 'इदं दुक्खन्ति, भिक्खवे, तथमेतं अवितथमेत'न्तिआदिवचनतो (सं० नि० ५.१०९०) 'अविज्जाय सङ्खारानं पच्चयट्ठो सङ्खारानं अविज्जापच्चयसम्भूतसमुदागतट्ठो तथो अवितथो अनञ्ञथो'तिआदिवचनतो च तथधम्मसङ्खाते सच्चपटिच्चसमुप्पादे याथावतो आगतो अभिसम्बुद्धो, तस्मा तथधम्मे याथावतो अभिसम्बुद्धोति तथागतो। (४)

''कथं **तथदस्सिताय तथागतो**? यस्मा अपरिमाणासु लोकधातूसु अपरिमाणानं सत्तानं छद्वारग्गहिते आरम्मणे अविपरीतमेव पस्सति जानाति, ञत्वा च पनेवं 'कतमं तं रूपायतनं, यं चतुन्नं महाभूतानं उपादाया'तिआदिना (ध० स० ६१६ आदयो) तथमेस अविपरीतं विभजति दस्सेति, तस्मा तथं आगच्छति पस्सति जानाति, तं वा आगमयति दस्सेतीति तथागतोति एवं तथदस्सिताय तथागतो। (५)

''कथं **तथवादिताय तथागतो**? यस्मा एस अभिसम्बोधितो याव परिनिब्बाना रागमदादिनिम्मथनवसेन एकसदिसमेव धम्मं तथं अवितथं भासति, तस्मा तथं गदति, तथो अविपरीतो आगदोवचनमेतस्साति वा द-कारस्स त-कारं कत्वा तथागतोति वुत्तोति एवं तथवादिताय तथागतो। (६)

''कथं **तथाकारिताय तथागतो**? भगवा हि 'यथा वादी तथा कारी'ति (अ० नि० ४.२३; चूळनि० पोसालमाणवपुच्छानिद्देस ८३) वचनतो अत्तनो वाचाय अनुरूपमेव करोति, तस्मा यथा वाचा, तथा कायोपि गतो पवत्तो इमस्साति तथागतोति एवं तथाकारिताय तथागतो। (७)

''कथं **अभिभवनट्ठेन तथागतो**? यस्मा पनेस अनुपमाय सकललोकियलोकुत्तरगुणसम्पदाय समन्नागतत्ता सदेवकं लोकं अभिभुय्य पवत्तति, तस्मा अभिभवनट्ठेन तथागतोति वुच्चती''ति।

तत्रेवं पदसिद्धि वेदितब्बा – अगदो वियाति अगदो, देसनाविलासो चेव पुञ्ञुस्सयो च। तेन हेस महानुभावो भिसक्को विय दिब्बागदेन सप्पे सब्बपरप्पवादिनो, सदेवकञ्च लोकं अभिभवति। इति सब्बलोकाभिभवने तथो अविपरीतो यथावुत्तो अगदो एतस्साति द-कारस्स त-कारं कत्वा तथागतोति वुच्चतीति अयमेत्थ सङ्खेपो। वित्थारो पन दीघागमसंवण्णनादीसु गहेतब्बो। आह चेत्थ –

''यथेव लोकम्हि विपस्सिआदयो,
सब्बञ्ञुभावं मुनयो इधागता।
तथा अयं सक्यमुनीपि आगतो,
तथागतो वुच्चति तेन चक्खुमा॥ (दी० नि० अट्ठ० १.७; म० नि० अट्ठ० १.१२; अ० नि० अट्ठ० १.१.१७०; बु०

वं० अट्ठ० १.२ निदानकथा)।

''पहाय कामादिमले यथा गता,
समाधिञाणेहि विपस्सिआदयो।
महेसिनो सक्यमुनी जुतिन्धरो,
तथा गतो तेन **तथागतो** मतो॥

''तथञ्च धात्वायतनादिलक्खणं,
सभावसामञ्ञविभागभेदतो।
सयम्भुञाणेन जिनोयमागतो,
तथागतो वुच्चति सक्यपुङ्गवो॥

''तथानि सच्चानि समन्तचक्खुना,
तथा इदप्पच्चयता च सब्बसो।
अनञ्ञनेय्येन यतो विभाविता,
याथावतो तेन जिनो **तथागतो**॥

''अनन्तभेदासुपि लोकधातुसु,
जिनस्स रूपायतनादिगोचरे।
विचित्तभेदे तथमेव दस्सनं,
तथागतो तेन समन्तलोचनो॥

''यतो च धम्मं तथमेव भासति,
करोति वाचायनुलोममत्तनो।
गुणेहि लोकं अभिभुय्यिरीयति,
तथागतो तेनपि लोकनायको''ति॥ (इतिवु० अट्ठ० ३८; दी० नि० टी० १.७)।

केनचि गुणेन अत्तनो विसिट्ठस्स कस्सचि अभावतो नत्थि एतस्स उत्तरोति अनुत्तरो। भगवतो हि अवीचितो पट्ठाय याव भवग्गं तिरियं अपरिमाणासु लोकधातूसु न कोचि केनचि गुणेन समसमोपि अत्थि, कुतो पन उत्तरितरो। यथाह –

''रूपे सीले समाधिम्हि, पञ्ञाय च असादिसो।
विमुत्तिया समसमो, धम्मचक्कप्पवत्तने''ति॥

विन्दित्वाति तीहि वन्दनाहि तन्निन्नतादिवसेन नमस्सित्वा। कायवचीमनोद्वारवसेन हि तिस्सो वन्दना। यथाह ''तिस्सो इमा, भिक्खवे, वन्दना कायेन वन्दति, वचसा वन्दति, मनसा वन्दती''ति। तत्थ बुद्धादिगुणारम्मणा कामावचरकुसलकिरियानमञ्ञतरा चेतना कायविञ्ञत्तिं समुट्ठापेत्वा कायद्वारप्पवत्तिवसेन उप्पन्ना **कायवन्दना**ति वुच्चति, सायेव वचीविञ्ञत्तिं समुट्ठापेत्वा वचीद्वारप्पवत्तिवसेन उप्पन्ना **वचीवन्दना**ति, उभयविञ्ञत्तियो पन

असमुट्ठापेत्वा केवलं मनोद्वारप्पवत्तिवसेन उप्पन्ना **मनोवन्दना**ति। **सिरसा**ति उत्तमङ्गेन करणभूतेन। अबुज्झि, बोधेतीति वा **बुद्धो**। अयञ्हि चतुसच्चधम्मे सयम्पि अबुज्झि, परेपि बोधेति, तस्मा बुज्झनबोधनट्ठेन ''बुद्धो''ति वुच्चति। यथाह ''बुज्झिता सच्चानीति बुद्धो, बोधेता पजायाति बुद्धो''ति (महानि० १९२; चूळनि० पारायनत्थुतिगाथानिद्देस ९७; पटि० म० १.१६२)। अथ वा बुध-सद्दस्स जागरणविकसनत्थेसुपि पवत्तनतो अबुज्झि सवासनसम्मोहनिद्दाय अच्चन्तं विगतो, बुद्धिया विकसितवाति वा **बुद्धो**। भगवा हि वत्थुसभावदस्सनविबन्धिकाय अविज्जासङ्खाताय निद्दाय अरियमग्गञाणेन सह वासनाय समुच्छिन्नत्ता ततो अच्चन्तं विगतो। परमरुचिरसिरिसोभग्गसमागमेन विकसितमिव पदुमं अपरिमितगुणगणालङ्कतसब्बञ्ञुतञ्ञाणसमागमेन विकसितो विकासमनुप्पत्तो, तस्मा जागरणविकसनत्थवसेनपि ''बुद्धो''ति वुच्चति।

एत्तावता च द्वीहि आकारेहि भगवतो थोमना कता होति अत्तहितसम्पत्तितो, परहितपटिपत्तितो च। तासु अत्तहितसम्पत्ति अनावरणञाणाधिगमो सवासनसकलसंकिलेसानमच्चन्तप्पहानं अनुपादिसेसनिब्बानाधिगमो च, परहितपटिपत्ति पन आसयप्पयोगवसेन दुविधं परहितसमीहनं। तत्थ धम्मदेसनाय अभाजनेसु देवदत्तादीसु विरोधिसत्तेसुपि निच्चं हितज्झासयता अपरिपाकगतिन्द्रियानं इन्द्रियपरिपाककालागमनञ्च **आसयो** नाम। तदञ्ञसत्तानं पन लाभसक्कारादिनिरपेक्खचित्तस्स यानत्तयमुखेन सब्बदुक्खनिय्यानिकधम्मदेसना **पयोगो** नाम। दुविधासु पनेतासु परहितपटिपत्तीसु, तिविधासु च अत्तहितसम्पत्तीसु अनन्तकरुणा-वचनेन, तथा आगतट्ठेन च तथागत-सद्देन आसयवसेन परहितपटिपत्ति दस्सिता, बोधनट्ठेन बुद्ध-सद्देन, तथदस्सनट्ठेन च तथागतट्ठेन च तथागतसद्देन पयोगवसेन, अनन्तपञ्ञा-वचनेन, ञाणगतिदीपकेन तथागत-सद्देन, बुज्झनजागरणविकसनट्ठेन च बुद्ध-सद्देन तिविधापि अत्तहितसम्पत्ति, अनुत्तरवचनेन च अत्तहितपरहितसम्पत्ति पकासितााति वेदितब्बा।

अपिच हेतुफलसत्तूपकारसम्पदावसेन तीहाकारेहिपि भगवतो थोमना पवत्ततीति तंवसेनपेत्थ थोमना दट्ठब्बा। तत्थ **हेतुसम्पदा** नाम महाकरुणासमायोगो, बोधिसम्भारसम्भरणञ्च तम्मूलकत्ता सकलबुद्धगुणानं। **फलसम्पदा** पन चतुब्बिधा ञाणसम्पदा, पहानसम्पदा, आनुभावसम्पदा, रूपकायसम्पदा चाति। तासु सब्बञ्ञुतञ्ञाणपदट्ठानं मग्गञाणं, मग्गञाणपदट्ठानं सब्बञ्ञुतञ्ञाणं, तम्मूलकानि च दसबलादिञाणानि **ञाणसम्पदा** नाम। अग्गमग्गभावनाय सब्बकिलेसानं सह वासनाहि अनुप्पत्तिधम्मतापादनं **पहानसम्पदा**। अचिन्तेय्यापरिमितानं सब्बलोकहितानं निप्फादने, सदेवकलोकाभिभवने च आधिपच्चं **आनुभावसम्पदा**। सकललोकनयनाभिसेकभूता पन लक्खणानुब्यञ्जनपटिमण्डिता अत्तभावसम्पत्ति **रूपकायसम्पदा** नाम। **सत्तूपकारो** हेट्ठा वुत्तपरहितपटिपत्तिवसेनेव वेदितब्बो। इमासु पन अनन्तकरुणा-वचनेन, तथा आगतट्ठेन च तथागत-सद्देन हेतुसम्पदा दस्सिता। फलसम्पदासु ञाणसम्पदा चेव पहानसम्पदा च अनन्तपञ्ञा-वचनेन, अभिसमयपरिदीपकेन तथागतसद्देन, बुज्झनजागरणविकसनट्ठेन, च बुद्ध-सद्देन दस्सिता, आनुभावसम्पदापि अभिभवनट्ठेन तथागत-सद्देन, अनुत्तर-वचनेन च विभाविता, रूपकायसम्पदा पन रूपग्गप्पत्तिदीपकेन अनुत्तर-सद्देन दस्सितााति दट्ठब्बं।

एवं बुद्धरतनस्स थोमनापुब्बङ्गमं पणामं कत्वा इदानि सेसरतनानम्पि पणाममारभन्तो आह **''धम्मं साधुगणम्पि चा''**ति। भगवतो थोमनेन च स्वाक्खाततादयो धम्मगुणा, सुप्पटिपन्नतादयो सङ्घगुणा च दस्सिता होन्ति तप्पभवस्स अनञ्ञथाभावतोति न तेसं विसुं थोमना कता। अधिगतमग्गे सच्छिकतनिरोधे पुग्गले यथानुसिट्ठं पटिपज्जमाने च अपायदुक्खेसु चेव वट्टदुक्खेसु च अपतमाने कत्वा धारेतीति **धम्मो,** सो चतुन्नं अरियमग्गानं, चतुन्नञ्च सामञ्ञफलानं, निब्बानस्स, परियत्तिधम्मस्स च वसेन दसविधो। वुत्तञ्हेतं **छत्तविमाने** –

''रागविरागमनेजमसोकं,
धम्ममसङ्खतमप्पटिकूलं।
मधुरमिमं पगुणं सुविभत्तं,
धम्ममिमं सरणत्थमुपेही''ति॥ (वि० व० ८८७)।

एत्थ हि कामरागादिभेदो सब्बोपि रागो विरज्जति एतेनाति ''रागविरागो''ति मग्गो कथितो। एजासङ्खाताय तण्हाय, अन्तोनिज्झानलक्खणस्स च सोकस्स तदुप्पत्तियं सब्बसो परिक्खीणत्ता ''अनेजमसोक''न्ति फलं कथितं। केनचि पच्चयेन असङ्खतत्ता ''धम्ममसङ्खत''न्ति निब्बानं वुत्तं। अविरोधदीपनतो पन अत्थब्यञ्जनस्स सम्पन्नताय, पकट्ठगुणविभावनतो सुट्ठु विभजितत्ता च ''अप्पटिकूल''न्तिआदिना सब्बोपि परियत्तिधम्मो कथितो। तत्थ अरियमग्गनिब्बानानि निप्परियायेनेव अपायादितो धारणतो धम्मो, फलपरियत्तियो पन परियायेन। तथा हेत्थ धारणं नाम अपायादिनिब्बत्तककिलेसविद्धंसनं। इति अरियमग्गस्स किलेससमुच्छेदकताय, निब्बानस्स च आलम्बणभावेन तस्स तदत्थसिद्धिहेतुतायपि उभिन्नम्पि निप्परियायतो लब्भति। इतरेसु पन अरियफलस्स मग्गेन समुच्छिन्नकिलेसानं पटिपस्सद्धकिच्चताय, मग्गानुकूलप्पवत्तितो परियत्तिधम्मस्स च तदधिगमहेतुतायाति उभिन्नम्पि परियायतोव लब्भतीति।

अत्तहितपरहितं साधेन्तीति साधू, तेसं गणो समुदायोति साधुगणो, साधु चायं गणो चाति वा साधुगणो, साधुनो वा सम्मासम्बुद्धस्स आयत्तो गणो तस्स ओरसपुत्तभावतोति साधुगणो। सो पन चतुन्नं अरियमग्गसमङ्गीनं, चतुन्नञ्च फलसमङ्गीनं वसेन अट्ठविधो अरियसङ्घो, तं **साधुगणं। पिचा**ति निपातसमुदायो, एको वा निपातो, तिण्णं रतनानं वन्दनकिरियाय सम्पिण्डनत्थो। केचि ''गणो''ति इध पकरणतोव अरियगणपुग्गलोव लब्भतीति साधूति भावनपुंसकवसेन ''वन्दित्वा''ति इमिना सह योजेन्ति, तदा पन **साधू**ति भयलाभादिविरहेन सक्कच्चं आदरन्ति अत्थो।

२. एवं पकरणारम्भे यथाधिप्पेतं रतनत्तयप्पणामं कत्वा इदानि यत्थ पाटवत्थाय इदं पकरणं पट्ठपीयति, तं सद्धिं देसकदेसपटिग्गाहकसम्पत्तीहि विभावेत्वा दस्सेन्तो आह **''पण्डुकम्बलनामाया''**तिआदि। तत्थ देवराजस्स पण्डुकम्बलनामाय सिलाय विमले सीतले तले निसिन्नो अतुलविक्कमो देवदेवेहि पूजितो देवदेवो देवपुरक्खतो देवानं देवलोकस्मिं यं धम्मं देसेसीति सम्बन्धो।

अयं पनेत्थ अत्थो – पण्डुकम्बलसरिक्खवण्णताय ''पण्डुकम्बल''न्ति नामं समञ्ञा एतिस्साति **पण्डुकम्बलनामा**। सा हि सक्कस्स तादिसपुञ्ञानुभावेन निब्बत्ता पण्डुकम्बलजयसुमनपुप्फसमानेन वण्णेन सब्बकालं विरोचति, पमाणतो पन सट्ठियोजनायामा, पञ्ञासयोजनवित्थारा, पन्नरसयोजनुब्बेधा च होति। **सिलाया**ति अवयवसम्बन्धे सामिवचनं। तुलाय सम्मितो तुल्यो, न तुल्यो अतुल्यो, अतुल्यो विक्कमो बलं एतस्साति अतुल्यविक्कमो। सम्मासम्बुद्धस्स हि परमपारमितानुभावसंसिद्धेन हत्थिगणनाय कोटिसहस्सहत्थीनं, पुरिसगणनाय दसकोटिसहस्सपुरिसानं बलेहि समप्पमाणेन कायबलेन, अप्पमाणेन च ञाणबलेन न कस्सचि देवब्रह्मादीसु अञ्ञतरस्स बलतुलनाय उपनेतब्बं अत्थि। अथ वा अनञ्ञसाधारणत्ता अतुल्यो परक्कमसङ्खातो अपरिमाणगुणविसेसावहेन अनञ्ञसाधारणेन सम्मप्पधानेन समन्नागतत्ता वा अतुल्यो सम्मप्पधानसङ्खातो विक्कमो इमस्साति अतुल्यविक्कमो। ''अतुल्यविक्कमो''ति च वत्तब्बे गाथाबन्धवसेन य-कारलोपं कत्वा **''अतुलविक्कमो''**ति वुत्तं। अथ वा सम्मितत्थे अ-कारपच्चयस्सापि सम्भवतो अतुलो विक्कमो अस्साति **''अतुलविक्कमो''**ति वुत्तं।

दिब्बन्तीति देवा, पञ्चकामगुणादीहि कीळन्ति, तेसु वा विहरन्ति, विजयसमत्थतायोगेन बाहिरब्भन्तरिके पच्चत्थिके

विजेतुं इच्छन्ति, इस्सरियधनादिसक्कारदानग्गहणं, तंतंअत्थानुसासनञ्च करोन्ता वोहरन्ति, पुञ्ञाणानुभावप्पत्ताय जुतिया जोतेन्ति, यथाधिप्पेतञ्च विसयं अप्पटिघातेन गच्छन्ति, यथिच्छितनिप्फादने च सक्कोन्तीति अत्थो। अथ वा देवनीया तंतंब्यसननित्थरणत्थिकेहि ''सरणं परायण''न्ति गमनीया, अभित्थवनीया सोभाविसेसयोगेन कमनीयाति वा देवा, ते तिविधा – सम्मुतिदेवा उपपत्तिदेवा विसुद्धिदेवाति। तत्थ **सम्मुतिदेवा** नाम महासम्मतादयो खत्तिया। **उपपत्तिदेवा** नाम चातुमहाराजिके उपादाय तदुत्तरिदेवा। **विसुद्धिदेवा** नाम खीणासवा। इध पन उपपत्तिदेवा दट्ठब्बा। नो च खो तेपि अविसेसेन, ठपेत्वा पन यामादिके चातुमहाराजिकतावतिंसवासिनोव अधिप्पेता। तेसं चतूहि सङ्गहवत्थूहि रञ्जनतो राजा, देवानं राजा इस्सरो देवराजा, तस्स **देवराजस्स,** ''सक्कस्स देवरञ्ञो''ति अधिप्पायो। **न** हि अञ्ञेसं देवलोकेसु निसिन्नो भगवा अभिधम्मपिटकं देसेसीति।

३. यन्ति अनियमनिद्देसो, तस्स पन ''तत्था''ति इमिना नियमनं वेदितब्बं। यथावुत्तानं तिण्णम्पि देवानं उत्तमो देवो तेहि सब्बेहि अधिकतरं कीळनादियोगतोति **देवदेवो,** भगवा। सो हि निरतिसयाय अभिञ्ञाकीळाय उत्तमेहि दिब्बब्रह्मअरियविहारेहि सपरसन्तानसिद्धाय पञ्चविधमारविजयिच्छानिब्बत्तिया चित्तिस्सरियसत्तधनादिसम्मापटिपत्तिअवेच्चप्पसादसक्कारदानग्गहणसङ्खातेन, यथापराधयथानुलोमयथाधम्मानुसासनसङ्खातेन च वोहारातिसयेन परमाय पञ्ञाय च सरीरप्पभासङ्खाताय जुतिया अनुपमाय ञाणसरीरगतिया मारविजयसब्बञ्ञुतञ्ञाणपरहितनिप्फादनेसु अप्पटिहताय सत्तिया च समन्नागतत्ता सदेवकेन वा लोकेन ''सरण''न्ति गमनीयतो, अभित्थवनीयतो, भत्तिवसेन कमनीयतो च सब्बे ते देवे तेहि तेहि गुणेहि अभिभुय्य ठितोति सब्बदेवेहि पूजनीयतरो देवो, विसुद्धिदेवभावसङ्खातस्स वा सब्बञ्ञुगुणालङ्कारस्स अधिगतत्ता अञ्ञेसञ्च देवानं अतिसयेन देवोति **देवदेवो। देवान**न्ति तदा धम्मपटिग्गाहकानं दससहस्सचक्कवाळाधिवासीनं मातुदेवपुत्तप्पमुखानं उपपत्तिदेवानं। विसुद्धिदेवानम्पेत्थ गहणन्ति वदन्ति। ते पन उपपत्तिदेवेस्वेव सङ्गहिता मनुस्सअरहन्तानं तत्थ अभावतो। **देवदेवेही**ति विसुद्धिदेवेहि। विसुद्धिदेवा हि वुत्तनयेन इतरदेवेहि सातिसयं कीळनादियोगतो इध ''देवदेवा''ति अधिप्पेता, तेहि। **पूजितो**ति पूजितब्बो, पूजितुं अरहोति अत्थो। एतेन विसुद्धिदेवेसुपि भगवतो अग्गपुग्गलतं दीपेति। **देसेसी**ति मधुरकरवीकसद्दसदिसं ब्रह्मस्सरं निच्छारेन्तो पकासेसि। **देवलोकस्मि**न्ति तावतिंसदेवलोके। सभावसामञ्ञलक्खणं धारेतीति धम्मो, कुसलादिभेदो अभिधम्मो, इध पन तप्पकासकं अभिधम्मपिटकं **''धम्म''**न्ति वुत्तं। तथा हि वक्खति ''पिटकुत्तमे''ति। **देवपुरक्खतो**ति दससहस्सचक्कवाळवासिदिब्बब्रह्मेहि पुरक्खतो, परिवारितोति अत्थो।

ननु च ''देवान''न्ति वचनेनेव देवपुरक्खतभावो सिद्धोति किं ''देवपुरक्खतो''ति वचनेन? नायं दोसो। भगवा हि कदाचि चूळपन्थकत्थेरादीनं विय परम्मुखेपि निसीदित्वा ओभासं विस्सज्जेत्वा सत्तानं सम्मुखे निसिन्नं विय दस्सेन्तो धम्मं देसेति, कदाचिपि पारायनिकब्राह्मणादीनं विय सम्मुखेपि निसीदित्वा अञ्ञेहि च परिवुतो अञ्ञेसम्पि धम्मं देसेति, इध पन न तथा, देवेहियेव परिवुतो देवानं देसेतीति दस्सनत्थं ''देवपुरक्खतो''तिपि वत्तब्बमेवाति।

४. एवमेतस्मिं पकरणे गारवजननत्थं तेन सम्पादेतब्बपाटवविसयं अभिधम्मपिटकं देसकादिसम्पत्तीहि सह विभावेत्वा इदानि यथाधिप्पेतपकरणारम्भपयोजनाभिधानाभिधेय्यसोतुजनसमुस्साहनकरणप्पकारानि च विभावेतुं **''तत्थाह''**न्तिआदि वुत्तं। तत्थ ''पाटवत्थाया''ति इमिना पकरणारम्भपयोजनं वुत्तं। ''अभिधम्मावतार''न्ति इमिना अभिधानाभिधेय्यानि। ''मधुर''न्तिआदीहि पकरणं विसेसेति। ''समासेना''ति च इमिना सोतुजनसमुस्साहनकरणप्पकारानीति दट्ठब्बं। ''अह''न्ति कत्तुभूतं अत्तानं निद्दिसति। तथा हि यो परो न होति, सो नियकज्झत्तसङ्खातो अत्ता ''अह''न्ति वुच्चति।

पटुनो भावो पाटवं, तंयेव अत्थो पयोजनट्ठेनाति **पाटवत्थो,** तदत्थाय। तं सन्धाय विविधनयग्गहणसमत्थस्स सुतमयञाणस्स उप्पादनत्थन्ति वुत्तं होति। संसारे भयं इक्खन्ति, भिन्दन्ति वा पापके अकुसले धम्मेति **भिक्खू,** तेसं। पिटकञ्च तं उत्तमञ्चाति पिटकुत्तमं, तस्मिं **पिटकुत्तमे,** अभिधम्मपिटकेति अधिप्पायो। तञ्हि परियत्तिभाजनत्थतो पिटकं, तीसु पिटकेसु विसिट्ठभावतो उत्तमञ्चाति पिटकुत्तमं। तत्थ **परियत्तिभाजनत्थतो**ति परियत्तिअत्थेन चेव भाजनत्थेन च। तथा हि ''मा पिटकसम्पदानेना''तिआदीसु (अ॰ नि॰ ३.६६) परियत्ति पिटकन्ति वुच्चति। ''अथ पुरिसो आगच्छेय्य कुदालपिटक''न्तिआदीसु (म॰ नि॰ १.२२८; अ॰ नि॰ ३.७०) यं किञ्चि भाजनम्पि। तस्मा इदम्पि परियापुणितब्बट्ठेन परियत्ति, अभिधम्मत्थानमाधारणत्थेन भाजनञ्चाति परियत्तिभाजनत्थतो पिटकन्ति वुच्चति। तेनेवाहु –

''पिटकं पिटकत्थविदू,
परियत्तिब्भाजनत्थतो आहु।
तेन समोधानेत्वा,
तयोपि विनयादयो ञेय्या''ति॥ (दी॰ नि॰ अट्ठ॰ १.पठममहासङ्गीतिकथा; पारा॰ अट्ठ॰ १.पठममहासङ्गीतिकथा; ध॰ स॰ अट्ठ॰ निदानकथा)।

विसिट्ठभावो पनस्स लोकवोहारमतिक्कम्म यथासभाववसेन देसनतो, विसिट्ठधम्मक्खन्धविभावनतो च वेदितब्बो। एत्थ हि ''सत्तो पुग्गलो भिक्खू''तिआदिकं लोकवोहारमतिक्कम्म ''खन्धधातुआयतन''न्तिआदिना यथाधम्मवसेनेव बाहुल्लदेसना पवत्ता, न इतरेसु विय यथावुत्तवोहारवसेन, यतो इदं यथाधम्मसासनन्ति वुच्चति। सब्बसङ्खतधम्मविसिट्ठो चेत्थ पञ्चक्खन्धो विसेसतो विभावितो, तस्मा तिण्णम्पि पिटकानं बुद्धवचनभावेपि यथासभावानतिक्कमदेसनादितो इदमेव तीसु पिटकेसु विसिट्ठन्ति युत्तं। अपिच धम्मातिरेकधम्मविसेसभावतो चस्स विसिट्ठभावो वेदितब्बो। अभिधम्मे हि निप्पदेसतो खन्धायतनादिधम्मानं विभत्तत्ता इतरद्वयतो अतिरेकतरा, विसिट्ठा च पाळि होति, तस्मा अतिरेकस्स, विसिट्ठस्स च पाळिधम्मस्स वसेन इदमेव तीसु पिटकेसु उत्तमन्ति वत्तुं वट्टति। यथावुत्तविसिट्ठभावयोगतोयेव चेतं ''अभिधम्मपिटक''न्ति वुच्चति अभि-सद्दस्स विसिट्ठभावजोतनतो। अपिच वुड्ढिमन्तादिधम्मानं एत्थ वुत्तत्ता चेतं अभिधम्मपिटकं। यथाहु पोराणा –

''यं एत्थ वुड्ढिमन्तो, सलक्खणा पूजिता परिच्छिन्ना।
वुत्ताधिका च धम्मा, अभिधम्मो तेन अक्खातो''ति॥ (दी॰ नि॰ अट्ठ॰ १.पठममहासङ्गीतिकथा; पारा॰ अट्ठ॰ १.पठममहासङ्गीतिकथा; ध॰ स॰ अट्ठ॰ निदानकथा)।

तथा हेत्थ ''रूपूपपत्तिया मग्गं भावेति, मेत्तासहगतेन चेतसा एकं दिसं फरित्वा विहरती''तिआदिना (ध॰ स॰ १६० आदयो) वुड्ढिमन्तोपि धम्मा वुत्ता, ''रूपारम्मणं वा सद्दारम्मणं वा''तिआदिना (ध॰ स॰ १) नयेन आरम्मणादीहि लक्खितब्बत्ता सलक्खणापि ''सेक्खा धम्मा असेक्खा धम्मा, लोकुत्तरा धम्मा''तिआदिना नयेन पूजिता पूजारहापि ''फस्सो होति, वेदना होती''तिआदिना (ध॰ स॰ १) नयेन सभावपरिच्छिन्नत्ता परिच्छिन्नापि ''महग्गता धम्मा अप्पमाणा धम्मा (ध॰ स॰ तिकमातिका १२, दुकमातिका ९९), अनुत्तरा धम्मा''तिआदिना नयेन अधिका विसिट्ठापि धम्मा वुत्ता, तस्मा अभि-सद्दस्स वुड्ढिआदिअत्थेसुपि पवत्तनतो ''वुड्ढिमन्तो धम्मा एत्था''तिआदिना निब्बचनेन इदं पिटकं ''अभिधम्म''न्ति वुच्चति। अभिधम्मं ओतरन्ति अनेनाति **अभिधम्मावतारं** नाम पकरणं। इमिना पनस्स अत्थानुगतमभिधानं दस्सेति। **तु**-सद्दो पदपूरणे। आचरियेन हि गाथापदपूरणत्थं येभुय्येन तत्थ तत्थ निपाता वुच्चन्ति। यत्थ पन नेसं पयोजनविसेसो दिस्सति,

तत्थेव तमत्थं वक्खाम। **मधुर**न्ति निप्परियायतो मधुर-सद्दोयं जिव्हाविञ्ञेय्ये रसविसेसे वत्तति, इध पन इट्ठभावसामञ्ञेन अत्थब्यञ्जनसम्पत्ति मधुरसद्देन वुत्ता। भवति हि तंसदिसस्स तं-सद्देनाभिधानं यथा ''अग्गिमाणवो''ति। तेन पन मधुरेन योगतो इदम्पि मधुरं यथा नीलगुणयोगतो नीलुप्पलन्ति। निपुणगम्भीराय ब्यञ्जनसम्पत्तिया चेव अत्थसम्पत्तिया च अभिधम्मविसयं मतिं वड्ढेतीति **मतिवड्ढनं**। अथ वा ब्यञ्जनसम्पत्तिया **''मधुर''**न्ति वुत्तं, अत्थसम्पत्तिया **''मतिवड्ढन''**न्ति।

५. **ताळ**न्ति कुञ्चिकं, कुञ्चिकासदिसन्ति अत्थो। मुय्हन्ति तेनाति मोहो, अविज्जायेतं अधिवचनं, मोहोयेव अभिधम्ममहापुरं पविसन्तानं पवेसननिवारणत्ता कवाटभूतोति **मोहकवाटं,** तस्स। विघाटेति, विघाटीयति अनेनाति वा **विघाटनं**। ननु च अविज्जाकवाटं पञ्ञाय उग्घाटीयति। सा हि तस्सा उजुविपच्चनीकभूताति? सच्चं, इदम्पि तस्सा कारणभावेन ''मोहकवाटविघाटनकर''न्ति वुत्तं। कारणकारणम्पि हि कारणवसेन वुच्चति यथा ''चोरेहि गामो दड्ढो, तिणेहि भत्तं सिद्ध''न्ति।

६. **सुदुत्तर**न्ति धम्मत्थदेसनापटिवेधसङ्खातचतुगम्भीरभावपटिसंयुत्तताय मन्दबुद्धीहि तरितुं असक्कुणेय्यत्ता अतिदुत्तरं, तेनेव चेदं महोदधिसमानत्ता **''महोदधी''**ति वुत्तं। महण्णवोपि हि चतुरासीतियोजनसहस्सगम्भीरो न सक्का अञ्ञत्र सिनेरुपब्बतराजतो केनचि पतिट्ठं लद्धुं, एवमिदम्पि चतुगम्भीरतापटिसंयुत्तं अञ्ञत्र तथागता न केनचि पतिट्ठं लद्धुं सक्काति। **तरन्तान**न्ति अत्थग्गहणवसेन उत्तरितुकामानं। एत्थ च ''तरंवा''ति अधिकारवसेन वत्तब्बं, वक्खमानं वा आनेत्वा सम्बन्धितब्बं। **तरन्तान**न्ति परतीरसम्पापुणनत्थं उत्तरन्तानं। **तरंवा**ति उळुम्पं विय, तंसमानन्ति अत्थो। मकरा नाम मच्छजातिका, तेसं आकरो निवासभूमीति **मकराकरो,** तं।

७. अभिधम्मे नियुत्ता **आभिधम्मिका,** तेसं। हत्थसारं वियाति **हत्थसारं**। यथा हि मनुस्सानं बहूसु रतनादीसु विज्जमानेसुपि आपदासु च सुखपरिभोगत्थं हत्थे कयिरमानं साररतनादिकं ''हत्थसार''न्ति वुच्चति, एवमिदम्पि सतिपि महन्ते अभिधम्मपिटके तस्स सब्बसो वित्तिण्णताय परिहरितुं असक्कुणेय्यत्ता तदत्थसारसम्पिण्डनवसेन कयिरमानं आभिधम्मिकभिक्खूनं सुखपरिहरणत्थाय सम्पज्जतीति हत्थसारसदिसत्ता ''हत्थसार''न्ति वुत्तं। **पवक्खामी**ति पकारेन कथेस्सामि, अनागतवचनञ्चेतं, वत्तमानसमीपत्ता वा अनागते वत्तमानूपचारतो वत्तमानवचनं, पटिञ्ञानन्तरमेव वक्खतीति। अत्थवसेन पकारेन कथेन्तोपि सद्दवसेन सङ्खिपित्वा कथेस्सामीति दस्सेन्तो आह **''समासेना''**ति। समसनं संखिपनं समासो, तेन **समासेन,** न ब्यासवसेनाति वुत्तं होति। एत्तावता च पयोजनाभिधानाभिधेय्यसोतुजनसमुस्साहनकरणप्पकारानि दस्सेत्वा इदानि यस्मा सोतुजनसमुस्साहनं नाम तेसं सक्कच्चसवने नियुञ्जनं, तस्मा ते तत्थ नियोजेन्तो आह **''तं सुणाथ समाहिता''**ति। सक्कच्चसवनपटिबद्धा हि सम्मापटिपत्तीति। तत्थ **त**न्ति तं मया वक्खमानं अभिधम्मावतारं **सुणाथ** निसामयथ। **समाहिता** सम्मा आहिता, अविक्खित्तचित्ताति अत्थो।

गन्थारम्भकथावण्णना निट्ठिता।

१. पठमो परिच्छेदो

चित्तनिद्देसो

कामावचरकुसलवण्णना

८. एवं ताव रतनत्तयप्पणामादिकं दस्सेत्वा इदानि यथारद्धप्पकरणस्स अत्थसरीरभूतमभिधम्मं सङ्खेपतो उद्दिसन्तो आह "**चित्तं चेतसिक**"न्तिआदि। तत्थ चित्तसद्दस्स ताव वचनत्थं सयमेव अनन्तरं विपञ्चेति। "**चेतसिक**"न्तिआदीसु पन अविप्पयोगीभावेन चेतसि चित्ते नियुत्तं, तत्थ वा भवं तदायत्तवुत्तितायाति **चेतसिकं,** वेदनादिक्खन्धत्तयस्सेतं अधिवचनं। रुप्पति, रूपीयतीति वा **रूपं,** सीतुण्हादीहि विकारमापज्जति, आपादीयतीति अत्थो, चतुन्नं महाभूतानं, चतुवीसतिउपादारूपानञ्च वसेन अट्ठवीसतिविधस्स रूपक्खन्धस्सेतं अधिवचनं। भवाभवं विननतो संसिब्बनतो वानं वुच्चति तण्हा, न विज्जति सा एत्थ, ततो वा निक्खन्तं एतन्ति **निब्बानं,** अमतं असङ्खतं वत्थु। **इति**-सद्दो निदस्सने। नत्थि एतस्स उत्तरितरोति **निरुत्तरो**। अथ वा चतुवेसारज्जविहारत्ता नत्थि एतस्स उत्तरं पच्चनीकवचनन्ति **निरुत्तरो**। ञाणप्पहानअन्तरायनिय्यानिकेसु हि सदेवके लोके न कोचि सत्थु सहधम्मिकं उत्तरं वचनं कथेतुं समत्थो अत्थीति। तत्र भगवा उत्रासाभावतो विसारदोव होति। वुत्तञ्हेतं भगवता –

> '''सम्मासम्बुद्धस्स ते पटिजानतो इमे धम्मा अनभिसम्बुद्धाति तत्र वत मं समणो वा ब्राह्मणो वा देवो वा मारो वा ब्रह्मा वा कोचि वा लोकस्मिं सहधम्मेन पटिचोदेस्सतीति निमित्तमेतं, सारिपुत्त, न समनुपस्सामि, एतमहं, सारिपुत्त, निमित्तं असमनुपस्सन्तो खेमप्पत्तो अभयप्पत्तो वेसारज्जप्पत्तो विहरामि।
>
> ''खीणासवस्स ते पटिजानतो इमे आसवा अपरिक्खीणाति तत्र वत मं...पे०... विहरामि।
>
> ''ये च खो पन ते अन्तरायिका धम्मा वुत्ता, ते पटिसेवतो नालं अन्तरायायाति तत्र वत मं...पे०... विहरामि।
>
> ''यस्स खो पन ते अत्थाय धम्मो देसितो, सो न निय्याति तक्करस्स सम्मा दुक्खक्खयायाति तत्र वत मं... पे०... विहरामी''ति (म० नि० १.१५०)।

चत्तारि अरियसच्चानि पकासेतीति **चतुसच्चप्पकासनो**। दुक्खसमुदयनिरोधमग्गवसेन हि चत्तारि अरियसच्चानि। यथाह, ''चत्तारिमानि, भिक्खवे, अरियसच्चानि। कतमानि चत्तारि? दुक्खं अरियसच्चं, दुक्खसमुदयं अरियसच्चं, दुक्खनिरोधं अरियसच्चं, दुक्खनिरोधगामिनी पटिपदा अरियसच्च''न्ति (सं० नि० ५.१०८३)। तत्थ तेभूमका धम्मा अनेकुपद्दवाधिट्ठानताय धुवसुभादिविरहेन, कुच्छिततुच्छट्ठेन **च दुक्खं** नाम। कम्मादिविसेसपच्चयसमवाये दुक्खुप्पत्तिकारणभावेन तण्हा **समुदयो** नाम ''समेच्च उदेति दुक्खं इमस्मा''ति कत्वा। दुक्खस्स अनुप्पादनिरोधपच्चयत्ता **दुक्खनिरोधो** निब्बानं। तं पन दुक्खनिरोधं आलम्बणकरणवसेन गमनतो पापुणनतो, तदधिगमाय पटिपदाभावतो चाति "**दुक्खनिरोधगामिनी पटिपदा**"ति लोकुत्तरमग्गो वुच्चति। सच्चट्ठो पन तेसं तच्छाविपरीतभूतभावतो वेदितब्बो। वुत्तञ्हि '''इदं दुक्खन्ति, भिक्खवे, तथमेतं अवितथमेतं अनञ्ञथमेत''न्ति (सं० नि० ५.१०९०) वित्थारो। एत्थ पन चतुन्नं अरियफलानं, अरियमग्गसम्पयुत्तानञ्च सच्चविनिस्सटभावेपि इध मग्गनिब्बानप्पकासनतावचनेनेव तप्पकासनत्थम्पि वुत्तं होति, अनासवभावेन एकलक्खणत्ता तंतंहेतुकविसयभावतो चाति दट्ठब्बं।

एत्थ च ''निरुत्तरो चतुसच्चप्पकासनो''ति इमेहि भगवतो चित्तादिचतुब्बिधधम्मदेसनानुकूलगुणविसेसं दस्सेति अतथाविधस्स तंदेसनासामत्थियायोगतो। अथ वा ''निरुत्तरो''ति वचनेन चतुब्बिधधम्मस्स अनञ्ञथत्तं दीपेति। ''चतुसच्चप्पकासनो''ति पन इमिना ये ते धम्मा भगवता विनेय्यपरिपाचनत्थं देसिता, न ते इध अधिप्पेता। ये पन

परिपाचितेहि तेहि अभिसमेतब्बवसेन दुक्खादयो चतुब्बिधा वुत्ता, तेयेव उद्दिसितब्बत्थेन अधिप्पेतातित दस्सेति।

एवं सङ्खेपतो चत्तारो धम्मे उद्दिसित्वा इदानि उद्देसो नाम निद्देसत्थाय होतीति यथाउद्दिट्ठधम्मे निद्दिसितुं **''तत्थ चित्त''**न्तिआदि आरद्धं। तत्थ **तत्था**ति तेसु चित्तादीसु धम्मेसु। **विसयविजाननं चित्त**न्ति यं विसयसङ्खातस्स आरम्मणस्स विजाननं उपलद्धि, तं चित्तन्ति अत्थो। इमिना पन चित्तस्स आरम्मणपटिबद्धवुत्तितं, अनिच्चतं, अकारकतञ्च दीपेति। ''विसयविजानन''न्ति हि आरम्मणेन चित्तं उपलक्खेन्तो तस्स तदायत्तवुत्तितं, तंदीपनेन च तदभिमुखकालेयेव उप्पत्तिदीपनतो अनिच्चभावञ्च दीपेति। भावनिद्देसेन पन विजाननमत्तदीपनतो अकारकभावं। यथापच्चयञ्हि पवत्तिमत्तमेवेतं, यदिदं सभावधम्मो नामाति। एवञ्च कत्वा सब्बेसम्पि चित्तचेतसिकधम्मानं भावसाधनमेव निप्परियायतो लब्भति। यं पन ''चिन्तेतीति चित्तं, तेन चित्तं विचरतीति विचारो''तिआदिना कत्तुकरणवसेन निब्बचनं वुच्चति, तं परियायकथनन्ति वेदितब्बं। सकसककिच्चेसु हि धम्मानं अत्तप्पधानतासमारोपनेन कत्तुभावो, तदनुकूलभावेन तंसम्पयुत्तधम्मसमूहे कत्तुभावसमारोपनेन करणत्तञ्च परियायतोव लब्भतीति। तथा निदस्सनं पन धम्मसभावतो अञ्ञस्स कत्तादिनो अभावपरिदीपनत्थन्ति वेदितब्बं।

''विसयविजानन''न्ति च एतेन चित्तस्स आरम्मणूपलद्धिलक्खणता वुत्ताति इदानिस्स रसादीनि वुच्चन्ति। पुब्बङ्गमरसञ्हि चित्तं सन्धानपच्चुपट्ठानं नामरूपपदट्ठानं। द्वारं पत्वा तदारम्मणञ्हि विभावनट्ठेन चित्तं पुब्बङ्गमं पुरेचारिकं। तथा हि चक्खुद्वारेन दट्ठब्बं रूपारम्मणं चित्तेनेव जानाति...पे०... मनोद्वारेन विञ्ञातब्बं धम्मारम्मणं चित्तेनेव जानाति। यथा हि नगरगुत्तिको नगरमज्झे सिङ्घाटके निसीदित्वा ''अयं नेवासिको, अयं आगन्तुको''ति आगतागतं जनं उपधारेति, एवं सम्पदमिदं दट्ठब्बं, तस्मा द्वारं पत्वा तदारम्मणं विभावनट्ठेन पुरेचारिकन्ति **पुब्बङ्गमरसं**। पच्छिमं पच्छिमं उप्पज्जमानं पुरिमं पुरिमं निरन्तरं कत्वा सन्दहमानमिव उपट्ठाति, गहणभावं गच्छतीति **सन्धानपच्चुपट्ठानं**। पञ्चवोकारे पनस्स नियमतो नामरूपं, चतुवोकारभवे नाममेव पदट्ठानन्ति **नामरूपपदट्ठानञ्च** होति। नानत्तं पन लक्खणादीनं उपरि वक्खमाननयेन वेदितब्बं। वक्खति हि **रूपपरिच्छेदे** –

''सामञ्ञं वा सभावो वा, धम्मानं लक्खणं मतं।
किच्चं वा तस्स सम्पत्ति, रसोति परिदीपितो॥

''फलं वा पच्चुपट्ठानं, उपट्ठाननयोपि वा।
आसन्नकारणं यं तु, तं पदट्ठानसञ्ञित''न्ति॥ (अभिध० ६३३-६३४)।

यत्थ यत्थ पन लक्खणादीनि वुच्चन्ति, तत्थ तत्थ इमिनाव नयेन तेसं नानत्तं वेदितब्बं।

वचनत्थविजाननेन विदितचित्तसामञ्ञस्स उत्तरि चित्तविभागो वुच्चमानो सोभेय्याति वचनत्थविजाननमेव ताव आदिम्हि युत्ततरन्ति तं ताव कथेतुकम्यताय पुच्छति **''तस्स पन को वचनत्थो''**ति। पञ्चविधा हि पुच्छा – (दी० नि० अट्ठ० १.७; म० नि० अट्ठ० १.४४९; सं० नि० अट्ठ० २.२.१; अ० नि० अट्ठ० १.१.१७०) अदिट्ठजोतनापुच्छा दिट्ठसंसन्दनापुच्छा विमतिच्छेदनापुच्छा अनुमतिपुच्छा कथेतुकम्यतापुच्छाति। तत्थ यं अञ्ञातं अदिट्ठं, तस्स ञाणाय दस्सनाय पञ्हाकरणं **अदिट्ठजोतनापुच्छा** नाम। यं पन ञातं दिट्ठं, तस्स अञ्ञेहि पण्डितेहि संसन्दनत्थाय पञ्हाकरणं **दिट्ठसंसन्दनापुच्छा** नाम। पकतिया पन संसयपक्खन्दनस्स अत्तनो संसयसमुग्घाटनत्थं पञ्हाकरणं **विमतिच्छेदनापुच्छा** नाम। ''तं किं मञ्ञथ, भिक्खवे, रूपं निच्चं वा अनिच्चं वाति? अनिच्चं, भन्ते। यं पनानिच्चं, दुक्खं वा तं सुखं

वा''तिआदिना (सं॰ नि॰ ३.७९; महाव॰ २१) अनुमतिग्गहणत्थं पञ्हाकरणं **अनुमतिपुच्छा** नाम। ''चत्तारोमे, भिक्खवे, सतिपट्ठाना। कतमे चत्तारो''तिआदिना (दी॰ नि॰ २.३७३; सं॰ नि॰ ५.४०२-४०४) पन तंतंधम्मानं देसनाधिप्पायेन पञ्हाकरणं **कथेतुकम्यतापुच्छा** नाम।

तासु पुरिमा तिस्सो आचरियानं न सम्भवन्ति। न हि ते गन्थकरणत्थाय आरभित्वा इदानि अदिट्ठं जोतेन्ति, दिट्ठं संसन्देन्ति, संसयं वा पक्खन्दन्ति तब्बिसोधनपुब्बकमेव गन्थकरणे अभिनिवेसनतो। इतरा पन द्वे सम्भवन्ति। तासु अयं कथेतुकम्यतापुच्छा। अपिच चोदनं समुट्ठापेन्ता आचरिया अञ्ञं चोदकं परिकप्पेत्वा तस्स वचनवसेन समुट्ठापेन्तीति तंवसेनेत्थ अदिट्ठजोतनाविमतिच्छेदनापुच्छापि लब्भन्तेवाति दट्ठब्बं। **तस्सा**ति तस्स चित्त-सद्दस्स। चित्ते हि अधिगते तस्स वाचको सद्दोपि सहचरियतो अधिगतोव होतीति तस्स इध त-सद्देन परिग्गहो। केचि पन ''तस्स चित्तस्सा''ति अत्थं वदन्ति, तं ''तस्स को वचनत्थो''ति इमिना न समेति। न हि चित्तस्स ''को वचनत्थो''ति पुच्छा सम्भवतीति।

इदानि यथापुच्छितमत्थं विस्सज्जेतुं **''वुच्चते''**ति ताव पटिञ्ञं कत्वा **''सब्बसङ्गाहकवसेना''**तिआदिना विस्सज्जनमारद्धं। तत्थ **सब्बसङ्गाहकवसेना**ति हेट्ठिमन्ततो चक्खुविञ्ञाणादयो उपादाय सब्बेसं आरम्मणविजाननसभावत्ता तेसं सब्बेसमेव सङ्गाहकवसेन, न पन वक्खमाननिब्बचनेसु विय यथालाभवसेनाति अत्थो। **चिन्तेती**ति विजानाति। चिन्तेन्ति तेन गोचरन्ति वा **चित्तं**। सम्पयुत्तधम्मानं कत्तुतासमारोपनेन हिस्स करणभावो लब्भति। सब्बसङ्गाहकवसेन ताव अत्थं दस्सेत्वा इदानि यथालाभवसेनपि दस्सेतुं **''अत्तसन्तानं वा चिनोतीतिपी''**तिआदि वुत्तं। सब्बचित्तसाधारणत्ता हि चित्त-सद्दस्स यत्थ यत्थ यथा यथा अत्थो लब्भति, तत्थ तत्थ तथा तथा गहेतब्बो। यस्स पन चित्तस्स यथावुत्तअत्थविसेसो न लब्भति, तं रुळ्हीवसेन चित्तन्ति वेदितब्बं। यथा किलञ्जादीहि कतम्पि तालपण्णेहि कतसरिक्खकताय रुळ्हीसद्देन ''तालवण्ट''न्त्वेव वुच्चतीति। **अत्तसन्तान**न्ति सकसन्तानं, जवनसन्तानन्ति अत्थो। अत्त-सद्दस्स हि परपच्चनीकवचनत्ता अत्तनो सन्तानोति सदिसवसेन उप्पज्जमानो जवनसन्तानो वुच्चति। तं **चिनोति** रासिं करोतीति अयमत्थो सासेवनकानं जवनचित्तानं वसेन दट्ठब्बो। तानि हि पुरेजातानि पच्छाजातानं आसेवनपच्चया हुत्वा अत्तनो जवनसन्तानस्स पगुणबलवभावकरणेन तं चिनन्ति नाम। **वा**-सद्दो असब्बसङ्गाहकत्थविकप्पने। **पि**-सद्दो किरियासम्पिण्डनत्थे। अथ वा ''सब्बसङ्गाहकवसेना''ति इमस्स इधापि सम्बन्धो होतीति इदम्पि सब्बसङ्गाहकवसेन वुत्तन्ति गय्हमाने अत्तसन्तानन्ति विञ्ञाणवचनस्स अत्त-सद्दस्स सकत्थवुत्तित्तायेव तंवसेन चित्तसन्तानन्ति अत्थो। अनन्तरादिपच्चयवसेन हि चित्तसन्तानस्स अब्बोच्छिन्नप्पवत्तिकरणतो सब्बमेव चित्तजातं चित्तसन्तानं चिनोति नाम। इमस्मिं पनत्थे **वा**-सद्दो किरियाविकप्पनत्थो। **पि**-सद्दो ''चित्त''न्ति इमस्स आकड्ढनत्थोति दट्ठब्बं। पुरिमपक्खे पन चित्तन्ति अधिकारतोव गहेतब्बं।

९. विचित्तं करोति, विचित्तस्स वा करणन्ति विचित्तकरणं, ततो **विचित्तकरणा,** विचित्तचित्तकम्मादीनं करणतोति अत्थो। लोकस्मिञ्हि यं किञ्चि चित्तकम्मादिभेदं विचित्तं सिप्पजातं, सब्बं तं चित्तेनेव चिन्तेत्वा करीयतीति। तेनाह भगवा – ''दिट्ठं वो, भिक्खवे, चरणं नाम चित्तन्ति? एवं, भन्ते। तम्पि खो, भिक्खवे, चरणं नाम चित्तं चित्तेनेव चिन्तित''न्ति (सं॰ नि॰ ३.१००)। स्वायमत्थो सविञ्ञत्तिकानं बात्तिंसचित्तानमुपलब्भति। सासवकुसलाकुसलं वा विचित्तगतिआदिकरणतो वा विचित्तकरणट्ठेन चित्तं। ननु च विचित्तगतिआदयो कम्मवसेन निप्फज्जन्ति। यथाह –

> ''कम्मनानाकरणं पटिच्च सत्तानं गतिया नानाकरणं पञ्ञायति अपदा द्विपदा चतुप्पदा बहुप्पदा रूपिनो अरूपिनो सञ्ञिनो असञ्ञिनो नेवसञ्ञीनासञ्ञिनो, कम्मनानाकरणं पटिच्च सत्तानं उपपत्तिया नानाकरणं

पञ्ञायति उच्चनीचता हीनपणीतता सुगतदुग्गतता, कम्मनानाकरणं पटिच्च सत्तानं अत्तभावे नानाकरणं पञ्ञायति सुवण्णदुब्बण्णता सुजातदुज्जातता सुसण्ठितदुस्सण्ठितता, कम्मनानाकरणं पटिच्च सत्तानं लोकधम्मे नानाकरणं पञ्ञायति लाभालाभे यसायसे निन्दापसंसायं सुखदुक्खे''ति (ध० स० अट्ठ० १)।

तस्मा कम्मभेदनिब्बत्तत्ता गतिआदीनं चित्तता। कम्मन्ति च चेतसिकधम्मभूता चेतना, अभिज्झादयो च वुच्चन्ति, न चित्तन्ति। कथं चित्तस्स विचित्तगतिआदिकरणन्ति? वुच्चते – कम्मस्स चित्तसन्निस्सितत्ता तन्निप्फादितम्पि चित्तेनेव कतं होति, यथा राजयोधेन पराजितो सत्तुरञ्ञा जितोति वुच्चति। विचित्तं करणमस्साति वा **विचित्तकरणं**। ततो एकट्ठानिकवज्जितञ्हि चित्तं पच्चेकं पटिसन्धादिविचित्तकिरियवन्तताय, सब्बमेव वा चित्तं आवज्जनादिअञ्ञमञ्ञविसदिसकिरियवन्तताय विचित्तकरणं युत्तन्ति। सब्बविकप्पेसुपि ''रूपभवो रूप''न्तिआदीसु विय उत्तरपदलोपो चित्तपरियायेन च विचित्त-सद्देन वा विग्गहो वि-सद्दलोपो वा दट्ठब्बो। अथ वा **''विचित्तकरणा''**ति इदं चित्तविचित्तभावस्स ञापकहेतुनिदस्सनं। तेन यस्मा इदं विचित्तकरणं, तस्मा तस्स विचित्तस्स निप्फादकं सयम्पि तथेव विचित्तन्ति विञ्ञातब्बन्ति एवं करणविचित्तताय विचित्तत्ता चित्तन्ति अत्थो। ठपेत्वा तं करणविचित्तताय विचित्तभावं अत्तनो एव जातिभूमिसम्पयोगादिवसेन विचित्तताय चित्तन्ति दस्सेन्तो आह **''अत्तनो चित्तताय वा''**ति। तत्थ यस्मा अञ्ञदेव कुसलं, अञ्ञं अकुसलं, अञ्ञं अब्याकतं, अञ्ञं कामावचरं, अञ्ञं रूपावचरादिभेदं, अञ्ञं सरागं, अञ्ञं वीतरागं, अञ्ञं सदोसं, अञ्ञं वीतदोसं, अञ्ञं समोहं, अञ्ञं वीतमोहं, अञ्ञं रूपारम्मणं, अञ्ञं सद्दादिआरम्मणं, रूपारम्मणेसु च अञ्ञं नीलारम्मणं, अञ्ञं पीतादिआरम्मणं। एवं सद्दारम्मणादीसुपि यथासम्भवं। सब्बेसु चेव तेसु अञ्ञं हीनं, अञ्ञं मज्झिमं, अञ्ञं पणीतं, हीनादीसु च अञ्ञं छन्दाधिपतेय्यं, अञ्ञं चित्ताधिपतेय्यं, अञ्ञं वीरियाधिपतेय्यं, अञ्ञं वीमंसाधिपतेय्यन्ति एवमादिना जातिभूमिसम्पयुत्तआरम्मणहीनमज्झिमपणीतअधिपतिआदीनं वसेन विचित्तमनेकप्पकारं, तस्मा इमाय अत्तविचित्तताय वा चित्तन्ति वुच्चतीति।

कामञ्चेत्थ एकमेव चित्तं एवं विचित्तं नाम न होति, विचित्तानं पन अन्तोगधत्ता एतेसु यं किञ्चि एकम्पि विचित्तताय चित्तन्ति वत्तुं वट्टति समुदायवोहारेन अवयवस्सापि वोहरियमानत्ता यथा पब्बतनदीसमुद्दादीनमेकदेसा दिट्ठा पब्बतादयो दिट्ठाति, यथा च एकेकचित्तसम्पयुत्तापि वेदनादयो रासट्ठेन खन्धवोहारेन ''वेदनाक्खन्धो सञ्ञाक्खन्धो''तिआदिना वुच्चन्ति। अपिचेत्थ विपाकविञ्ञाणं कम्मकिलेसेहि चितन्ति चित्तं, तं किलेससहायेन कम्मुना फलभावेन निब्बत्तितं तेहि चितं नाम होति। होतु ताविदं लोकियविपाकं सन्धाय, लोकुत्तरं पन पत्वा कथन्ति? वुच्चते – ''कतमे धम्मा कुसला, यस्मिं समये लोकुत्तरं कुसलं चित्तं उप्पन्नं होति…पे०… तस्मिं समये अविज्जापच्चया सङ्खारा''तिआदिना अरियमग्गचेतनायपि अविज्जूपनिस्सयभावस्स पकासितत्ता लोकुत्तरकुसलस्सापि अनुसया उपनिस्सया होन्तीति तन्निब्बत्तितस्स विपाकस्स कम्मकिलेससञ्चिततापरियायो लब्भतीति। चितं तायतीति वा **चित्तं**। कम्मादिसञ्चितोपि हि अत्तभावो विञ्ञाणूपरमे मतोति वुच्चति। यथाह –

''आयु उस्मा च विञ्ञाणं, यदा कायं जहन्तिमं।
अप्पविद्धो तदा सेति, निरत्थंव कलिङ्गर''न्ति॥ (सं० नि० ३.९५)।

६४-६. सब्बे लोकुत्तरे अट्ठ कत्वा ये एकूननवुति चित्तुप्पादा वुत्ता, तानि चित्तानि मया निद्दिट्ठानीति सम्बन्धो। पाटवं अत्थेन्ति पत्थेन्ति, पाटवसङ्खातो वा अत्थो एतेसन्ति **पाटवत्थिनो**। **उग्गहेतब्बो**ति सवनपटिपुच्छावसेन उग्गहितब्बो, उग्गण्हित्वा पन न केवलं उग्गहणमत्तेयेव ठातब्बन्ति दस्सेन्तो आह ''**चिन्तेतब्बो पुनप्पुन**''न्ति, न हि सक्का उग्गहणमत्तेनेवेत्थ सब्बथा सन्निट्ठानं गन्तुन्ति अधिप्पायो। **अभिधम्ममहोदधि**न्ति धम्मसङ्गणीआदिसत्तप्पकरणवसेन ठितमभिधम्मपिटकमहण्णवं, खन्धायतनादिवसेन ठितं परमत्थमहण्णवं वा। **तरन्ती**ति अत्थग्गहणवसेन उत्तरन्ति, सुतमयञाणमूलकेन वा भावनाञाणेन ओतरन्तीति अत्थो। **इमं लोक**न्ति पच्चुप्पन्नभवं। **परं लोक**न्ति अनागतभवं। **तरन्ती**ति अतिक्कमन्ति। इध लोकस्मिञ्हि छन्दरागप्पहानवसेन इमं लोकं तरन्ति, आयतिं भवूपपादकस्स कम्मस्स

कम्मक्खयकरञाणेन विनासनतो परलोकं तरन्ति, अनुपादापरिनिब्बानवसेन परिनिब्बायन्तीति अत्थो।

इति अभिधम्मत्थविकासिनिया नाम

अभिधम्मावतारसंवण्णनाय

चित्तनिद्देसवण्णना निट्ठिता।

२. दुतियो परिच्छेदो

चेतसिकनिद्देसवण्णना

६७. एत्तावता च चित्तं चेतसिकं रूपं निब्बानन्ति एवं उद्दिट्ठेसु चतूसु धम्मेसु चित्तं ताव जातिभूमिसम्पयोगप्पवत्ताकारादिवसेन विभागेन निद्दिसित्वा इदानि तदनन्तरं उद्दिट्ठे चेतसिकधम्मे निद्दिसितुं ''**चित्तानन्तरमुद्दिट्ठा**''तिआदि आरद्धं। **विभाजन**न्ति जातिभूमिआदिवसेन विभागं, तेसु तेसु चित्तेसु यथारहं सम्पयोगवसेन विसुं विसुं भाजनञ्च।

कतमे पन चेतसिका, येसं विभाजनं वुच्चतीति ते सह निब्बचनेन सरूपतो दस्सेतुं ''**तत्थ चित्तसम्पयुत्ता**''तिआदि वुत्तं। तत्थ ''**चित्तसम्पयुत्ता**''ति इदं चेतसिकलक्खणदस्सनं। तेन ये चित्तेन सह सम्पयोगलक्खणेन युत्ता, तेयेव चेतसिकाति दस्सेति। किं पन तं सम्पयोगलक्खणन्ति? एकुप्पादएकनिरोधएकवत्थुकएकारम्मणसङ्खाता पकारा। समं पकारेहि युत्ताति हि सम्पयुत्ता। तत्थ यदि एकुप्पादतामत्तेनेव च सम्पयुत्तता अधिप्पेता, सहुप्पत्तिकानं रूपारूपधम्मानं अञ्ञमञ्ञसम्पयुत्तता आपज्जेय्याति **एकनिरोध**-ग्गहणं। एवम्पि अविनिब्भोगरूपानं अञ्ञमञ्ञसम्पयुत्तता आपज्जेय्याति **एकवत्थुक**-ग्गहणं। एवम्पि ''अविनिब्भोगरूपेसु एकं महाभूतं सेसमहाभूतोपादारूपानं निस्सयपच्चयो होतीति तस्मा तानि एकवत्थुकानीति, चक्खादीनं निस्सयभूतानि वा भूतानि एकं वत्थु एतेसु निस्सितन्ति एकवत्थुकानी''ति कप्पेन्तस्स तेसं सम्पयुत्ततापत्ति सियाति तन्निवारणत्थं **एकारम्मण**-ग्गहणं।

पटिलोमतो वा ''एकारम्मणा''ति वुत्ते एकवीथियं पञ्चविञ्ञाणसम्पटिच्छनादीनं, नानावीथियं परसन्ताने च एकस्मिं आरम्मणे उप्पज्जमानानं भिन्नवत्थुकानं सम्पयुत्तता आपज्जेय्याति **एकवत्थुक**-ग्गहणं। एवम्पि मरणासन्नवीथियं सम्पटिच्छनसन्तीरणादीनं सम्पयुत्तता आपज्जेय्याति **एकनिरोध**-ग्गहणं। किं पन नानुप्पादापि एवं तिविधलक्खणा होन्ति, अथ एकुप्पादा एवाति विचारणाय एकुप्पादा एव एवं तिविधलक्खणा होन्तीति दस्सनत्थं ''**एकुप्पादा**''ति वुत्तं। इति इमेहि चतूहि सम्पयोगलक्खणेहि ये चित्तसम्पयुत्ता, ते चेतसिका नामाति एवं चेतसिकलक्खणं ठपितं होति। कथं पनेते चेतसिका नामाति आह ''**चित्ते भवा**''ति। ''चेतसि भवा चेतसिका''ति वत्तब्बे चित्त-सद्दस्सपि चेतो-सद्देन सह समानत्थताय अत्थमत्तं दस्सेतुं ''**चित्ते भवा चेतसिका**''ति वुत्तं।

नियताति नियतुप्पत्तिका, करुणामुदितादयो विय कदाचि अनुप्पज्जित्वा यदा यदा तं चित्तं उप्पज्जति, तदा तदाव तेन अविनिभुत्ता हुत्वा जायमानाति अत्थो। **सरूपेन आगता**ति छन्दादयो विय ''ये वा पन तस्मिं समये अञ्ञेपि अत्थि पटिच्चसमुप्पन्ना अरूपिनो धम्मा''ति एवं येवापनकवसेन अनागन्त्वा ''फस्सो होति, वेदना होती''तिआदिना (ध॰ स॰ १)

सरूपेनेव **पाळियं** आगता। येवापनाति एवं देसना एतेसन्ति **येवापनका। एकूनतिंस धम्मा**ति किच्चभेदं अनामसित्वा केवलं असम्भिन्नधम्मवसेनेव एकेनूना तिंस धम्मा। पाळियं पन चित्तेन सह तिंस धम्मे गहेत्वा तेसं किच्चभेदतो गहणेन छप्पञ्ञास धम्मा वुत्ता। **सेय्यथिद**न्ति सरूपपुच्छा। **फस्सो...पे०... चित्तुजुकता**ति यथापुच्छितानं सरूपदस्सनं। **इति**-सद्दो परिसमापने, निदस्सने वा। पुन तेत्तिंस होन्तीति सम्बन्धो। **तेत्तिंस होन्ती**ति तेयेव एकूनतिंस धम्माति अधिप्पायो।

''कदाचि उप्पज्जन्ती''ति वुत्तं, तं कथं दट्ठब्बन्ति आह **''इमेसू''**तिआदि। **करुणामुदितावसेना**ति पठमसमन्नाहारतो पट्ठाय गोत्रभुपरियोसानप्पवत्तितकरुणामुदितापरिकम्मवसेन। **करुणापुब्बभागो**ति करुणाय पुब्बभागो, परिकम्मप्पनावसेन पवत्तकरुणाभावनाय अप्पनाकोट्ठासतो पुरिमकोट्ठासो, पठमसमन्नाहारतो पट्ठाय गोत्रभुपरियोसानप्पवत्तपरिकम्मकोट्ठासो हुत्वाति अत्थो। एवं **''मुदितापुब्बभागो''**ति एत्थापि। भाग-सद्दस्स द्रब्यवुत्तिताय तप्पुरिसस्स च उत्तरपदत्थप्पधानताय ''करुणापुब्बभागो''तिआदिना पुल्लिङ्गेन वुत्तं। एत-सद्दस्स पन गुणवुत्तिताय गुणविसेसवति वत्तमानो तस्स लिङ्गवसेन परिणमतीति करुणामुदितापेक्खाय **''एता''**ति इत्थिलिङ्गवसेन वुत्तन्ति। **न पनेकतो उप्पज्जन्ति,** किञ्चरहि विसुं विसुंयेवाति अत्थो। तेनेव हि ''करुणापुब्बभागो वा मुदितापुब्बभागो वा''ति विकप्पो वुत्तोति। कस्मा पनेता द्वे एकतो नुप्पज्जन्तीति? भिन्नारम्मणत्ता। करुणा हि दुक्खितसत्ते आरब्भ तेसं दुक्खापनयनकामतावसेन पवत्तति, मुदिता सुखितसत्ते आरब्भ तेसं सुखानुमोदनवसेन, तस्मा उभिन्नम्पि भिन्नविसयत्ता न एकस्मिं चित्ते उप्पत्ति सम्भवतीति। **मिच्छाकम्मन्तादीही**ति **आदि**-सद्देन मिच्छावाचामिच्छाजीवानं गहणं। **सम्माकम्मन्तादीनि परिपूरेन्ती**ति सम्माकम्मन्तसम्मावाचासम्माआजीवानि परिपूरेन्ति। **को विरती**ति तीसु एका विरति उप्पज्जति, सम्माकम्मन्तं पूरेन्ती पठमा, सम्मावाचं पूरेन्ती दुतिया, सम्माआजीवं पूरेन्ती ततिया विरति उप्पज्जतीति अत्थो। **करुणामुदिताहि सह न उप्पज्जन्ति** तासं पञ्ञत्तारम्मणत्ता, विरतिया च एकन्तपरित्तारम्मणत्ता। **अञ्ञमञ्ञेन च न उप्पज्जन्ति** अञ्ञमञ्ञस्सपि भिन्नविसयत्ता। मिच्छाकम्मन्तादीनञ्हि आरम्मणानेव यथाक्कमं सम्माकम्मन्तादीनं आरम्मणानि ततो विरतिभावतो। **एतेसू**ति इमेसु पञ्चसु।

६८. विरतीनम्पि सङ्गहणत्थं ''करुणामुदितादीसू''ति वत्तब्बे गाथाबन्धसुखत्थं आदि-सद्दलोपवसेन **''करुणामुदितासू''**ति वुत्तं। एवञ्च कत्वा वुत्तं **''एकेना''**ति, इतरथा ''एकाया''ति वत्तब्बन्ति।

६९-७१. किं पनेत्थ कारणं, चतूसु ब्रह्मविहारेसु द्वे इध निद्दिट्ठा, न इतराति चोदेन्तो आह **''कस्मा पना''**तिआदि। उपेक्खा च न उद्धटाति सम्बन्धो। नवहि लोकुत्तरधम्मेहि जनं रञ्जेतीति **धम्मराजा**। दिट्ठधम्मिकसम्परायिकत्थेहि सदेवकं लोकं अनुसासतीति **सत्था। अब्यापादेन मेत्ता गहिता** तस्सेव हिताकारप्पवत्तिकाले मेत्ताभावूपगमनतो। तेनेव हेस ''मेत्ता मेत्तायना''तिआदिना निद्दिट्ठो। **तत्रमज्झत्तताय उपेक्खा गहिता** तायेव सत्तेसु मज्झत्ताकारप्पवत्ताय उपेक्खाब्रह्मविहारभावतो। आदिच्चेन सह समानगोत्तताय, अरियसावकभावेन वा तस्स भगवतो पुत्तताय आदिच्चो बन्धु इमस्स, आदिच्चस्स वा बन्धूति **आदिच्चबन्धु**।

७२. **रासि**न्ति फस्सपञ्चकादिसत्तरसरासिं। पठममहाचित्तुप्पादवसेन हि –

> ''फस्सो होति, वेदना होति, सञ्ञा होति, चेतना होति, चित्तं होति, वितक्को होति, विचारो होति, पीति होति, सुखं होति, चित्तस्सेकग्गता होति, सद्धिन्द्रियं होति, वीरियिन्द्रियं होति, सतिन्द्रियं होति, समाधिन्द्रियं होति, पञ्ञिन्द्रियं होति, मनिन्द्रियं होति, सोमनस्सिन्द्रियं होति, जीवितिन्द्रियं होति, सम्मादिट्ठि होति, सम्मासङ्कप्पो होति,

सम्मावायामो होति, सम्मासति होति, सम्मासमाधि होति, सद्धाबलं होति, वीरियबलं होति, सतिबलं होति, समाधिबलं होति, पञ्ञाबलं होति, हिरिबलं होति, ओत्तप्पबलं होति, अलोभो होति, अदोसो होति, अमोहो होति, अनभिज्झा होति, अब्यापादो होति, सम्मादिट्ठि होति, हिरी होति, ओत्तप्पं होति, कायपस्सद्धि होति, चित्तपस्सद्धि होति, कायलहुता होति, चित्तलहुता होति, कायमुदुता होति, चित्तमुदुता होति, कायकम्मञ्ञता होति, चित्तकम्मञ्ञता होति, कायपागुञ्ञता होति, चित्तपागुञ्ञता होति, कायुजुकता होति, चित्तुजुकता होति, सति होति, सम्पजञ्ञं होति, समथो होति, विपस्सना होति, पग्गाहो होति, अविक्खेपो होती''ति (ध० स० १) –

एवं धम्मुद्धारं करोन्तेन भगवता फस्सादयो तिंस धम्मे छप्पञ्ञास कत्वा फस्सपञ्चकरासि झानपञ्चकरासि इन्द्रियट्ठकरासि मग्गपञ्चकरासि बलसत्तकरासि हेतुत्तिकरासि कम्मपथतिकरासि लोकपालदुकरासि छयुगळदुकरासि उपकारदुकरासि युगनन्धदुकरासि वीरियसमथदुकरासीति सत्तरसन्नं रासीनं वसेन विभागो कतो।

कथं? एतेसुपि चित्तं ताव फस्सपञ्चकं पत्वा ''चित्तं होती''ति वुत्तं, इन्द्रियानि पत्वा ''मनिन्द्रिय''न्ति। वितक्को झानङ्गानि पत्वा ''वितक्को होती''ति वुत्तो, मग्गङ्गानि पत्वा ''सम्मासङ्कप्पो''ति। सद्धा इन्द्रियानि पत्वा ''सद्धिन्द्रियं होती''ति वुत्ता, बलानि पत्वा ''सद्धाबल''न्ति। हिरी बलानि पत्वा ''हिरिबलं होती''ति वुत्ता, लोकपालदुकं पत्वा ''हिरी''ति। ओत्तप्पेपि एसेव नयो। अलोभो मूलं पत्वा ''अलोभो होती''ति वुत्तो, कम्मपथं पत्वा ''अनभिज्झा''ति। अदोसो मूलं पत्वा ''अदोसो होती''ति वुत्तो, कम्मपथं पत्वा ''अब्यापादो''ति। इमे सत्त द्वीसु ठानेसु विभत्ता। वेदना पन फस्सपञ्चकं पत्वा ''वेदना होती''ति वुत्ता, झानङ्गानि पत्वा ''सुख''न्ति, इन्द्रियानि पत्वा ''सोमनस्सिन्द्रिय''न्ति। एवमयं एको धम्मो तीसु ठानेसु विभत्तो। वीरियं पन इन्द्रियानि पत्वा ''वीरियिन्द्रियं होती''ति वुत्तं, मग्गङ्गानि पत्वा ''सम्मावायामो''ति, बलानि पत्वा ''वीरियबल''न्ति, वीरियसमथं पत्वा ''पग्गाहो''ति। सतिपि इन्द्रियानि पत्वा ''सतिन्द्रियं होती''ति वुत्ता, मग्गङ्गानि पत्वा ''सम्मासती''ति, बलानि पत्वा ''सतिबल''न्ति, उपकारदुकं पत्वा ''सति होती''ति। एवं इमे द्वे धम्मा चतूसु ठानेसु विभत्ता। समाधि पन झानङ्गानि पत्वा ''चित्तस्सेकग्गता होती''ति वुत्तो, इन्द्रियानि पत्वा ''समाधिन्द्रिय''न्ति, मग्गङ्गानि पत्वा ''सम्मासमाधी''ति, बलानि पत्वा ''समाधिबल''न्ति, युगनन्धदुकं पत्वा ''समथो''ति, वीरियसमथं पत्वा ''अविक्खेपो होती''ति। एवमयं एको धम्मो छसु ठानेसु विभत्तो। पञ्ञा पन इन्द्रियानि पत्वा ''पञ्ञिन्द्रियं होती''ति वुत्ता, मग्गङ्गानि पत्वा ''सम्मादिट्ठी''ति, बलानि पत्वा ''पञ्ञाबल''न्ति, मूलानि पत्वा ''अमोहो''ति, कम्मपथं पत्वा ''सम्मादिट्ठी''ति, उपकारदुकं पत्वा ''सम्पजञ्ञ''न्ति, युगनन्धदुकं पत्वा ''विपस्सना''ति। एवमयं एको धम्मो सत्तसु ठानेसु विभत्तोति एवमेते द्वादस धम्मा इन्द्रियादितंतंकिच्चवन्तताय द्विट्ठानिकादिभेदेन सत्तरससु रासीसु विभत्ता। इतरे अट्ठारस किच्चवसेन भेदाभावतो एकट्ठानिकायेवाति इमेसु सत्तरससु रासीसु येवापनकधम्मा एकरासिम्पि न भजन्ति तंतंकिच्चभावतोति कत्वा वुत्तं **''रासिं भजन्ति ना''**ति।

ननु चेते किञ्चापि सेसरासयो न भजन्ति तेसं सदिसकिच्चसङ्गहवसेन ठितत्ता। फस्सपञ्चकरासि पन खन्धसङ्गहवसेनेव ठपितोति चेतनाय विय नेसं सङ्खारक्खन्धसङ्गहतो तत्थ समवरोधो युत्तोति? तं न, खन्धसङ्गहवसेन ठपितोपि हि फस्सपञ्चकरासि सब्बचित्तसाधारणधम्मे सङ्गहेत्वा ठपितोति छन्दादीनं तिण्णं पकिण्णकवसेन उप्पज्जमानानं सब्बचित्तसाधारणताय अभावतो, मनसिकारस्स च सतिपि सब्बचित्तसाधारणत्ते निप्परियायतो सङ्खारक्खन्धसङ्गहाभावतो न एतेसं फस्सपञ्चकरासिभजनम्पि युत्तन्ति। कस्मा पन मनसिकारस्स निप्परियायतो सङ्खारक्खन्धसङ्गहाभावोति? वुच्चते – ठपेत्वा चेतनं सेसधम्मानं सकसककिच्चेसुपि पराधीनभावेन पवत्तनतो अभिसङ्खरणलक्खणं निप्परियायतो न लब्भति। यदि लभेय्य, चित्तेकग्गताजीवितिन्द्रियानं सब्बचित्तसाधारणत्ता वेदनाविञ्ञाणानि विय तानि फस्सपञ्चके वत्तब्बानि सियुं,

न पनेवं वुत्ता, तस्मा ठपेत्वा चेतनं सेसधम्मानं अभिसङ्खरणलक्खणं निप्परियायतो न लब्भतीति न तेसं निप्परियायतो खन्धसङ्गहो लब्भति। चेतनाययेव पन सकिच्चपरकिच्चसाधनवसेन पवत्तनतो निप्परियायतो अभिसङ्खरणलक्खणस्स अत्थिताय खन्धसङ्गहो लब्भतीति। यदि एवं कथं फस्सो फस्सपञ्चके वुत्तोति? ''फस्सपच्चया वेदना (विभ० २२५), फुट्ठो वेदेति, फुट्ठो सञ्जानाती''तिआदिवचनतो (सं० नि० ४.९३) वेदना सञ्ञा चेतना विञ्ञाणन्ति इमेसं अरूपक्खन्धानं उद्देसट्ठाने ठत्वा तेसं पच्चयस्सपि उद्दिसितुकामताय फस्सो तत्थ वुत्तो। **दुब्बला**ति सकविसयेपि परायत्तभावेनेव पवत्तनतो दुब्बला। अधिमोक्खो हि समाधिस्स परिब्यत्तभावे परिब्यत्तभावतो समाधायत्तवुत्ति, मनसिकारोपि चेतनाय परिब्यत्तभावतो चेतनायत्तवुत्तीति परायत्ताव ते होन्ति।

७३. **मनसी च कारो**ति मनसिकारो च। मनसिकारसद्दस्स हि अत्थमत्तसन्दस्सनवसेन गाथाबन्धसुखत्थं असमासनिद्देसो, दीघकरणं, मज्झे च च-सद्दवचनन्ति। तेन मुनिवरेनाति सम्बन्धो।

७४-८०. पठमाभिनिपातत्ताति आरम्मणे फुसनवसेन पठममेव अभिनिपतनतो। सब्बेपि चेतसिका चित्तायत्ता चित्तकिरियभावेन वुच्चन्तीति **''चित्तस्सा''**ति वुत्तं। **किरा**ति अरुचिसूचनं। एवं महासंघिकमतं दस्सेत्वा इदानि तमेव वित्थारेतुं **''फुसित्वा पना''**तिआदि वुत्तं। महासंघिका हि ''पठमं फस्सो आरम्मणं फुसति, अथ तेन फुट्ठं दुतियं वेदना वेदियति, एवं एतेहि फुट्ठवेदितं ततियं सञ्ञा सञ्जानाति, तेहि पन फुट्ठवेदितसञ्ञाते चतुत्थं चेतनाय सम्पयुत्तधम्मे अभिसन्दहती''तिआदिना वदन्ति। **बलवपच्चयत्ता**ति यथा पासादं पत्वा थम्भा सेसदब्बसम्भारानं बलवपच्चया, एवमेस यस्मा सेससम्पयुत्तानं बलवपच्चयो, तस्माति अत्थो। **तस्मा**ति हेतुनिगमनं।

सहेव चाति **च**-सद्दो अट्ठानप्पयुत्तो, सो ''चित्तजान''न्ति इमस्स अनन्तरं दट्ठब्बो। कस्मा? चित्तानं, चित्तजानञ्च एकुप्पादादिभावेन सहेव पवत्तितोति एवमेत्थ पदसम्बन्धो वेदितब्बो। **इद**न्ति इदं यथावुत्तविधानं, एवं ''पठमाभिनिपातत्ता''ति कारणं परिहरित्वा इदानि ''बलवपच्चयत्ता''ति इदं परिहरन्तो आह **''बलव...पे०... दिस्सती''**ति। **च**-सद्दो अवधारणे, नेव दिस्सतीति अत्थो। सेसधम्मानम्पि हि सहजातपच्चयभावस्स साधारणत्ता तस्सेव बलवपच्चयभावे न किञ्चि कारणं दिस्सतीति। यदि सब्बमिदमकारणं, कथञ्चरहि फस्सो पठमं वुत्तोति आह **''देसनाक्कमतो''**तिआदि। ''वेदना होति, फस्सो होति, सञ्ञा होति, फस्सो होति, चेतना होति, फस्सो होति, चित्तं होति, फस्सो होति, वेदना होति, सञ्ञा होति, चेतना होति, वितक्को होती''तिआदीहि आहरितुम्पि वट्टेय्य, देसनावारेन पन फस्सोव पठमं वुत्तोति वेदितब्बो। यथा चेत्थ, एवं सेसधम्मेसुपि पुब्बापरक्कमो नाम न परियेसितब्बो। **वचनत्थलक्खणादीही**ति वचनत्थतो च लक्खणादितो च।

फुसतीति कत्तुनिद्देसो। तत्थ कारणं हेट्ठा वुत्तमेव, फुसन्ति एतेन वाति फस्सो। सम्पयुत्तधम्मा हि आरम्मणे पवत्तमाना तं फुसनलक्खणेन फस्सेन फुसन्ता विय होन्ति, आरम्मणफुसनमत्तं वा फस्सोतिपि साधनत्तयम्पि युज्जतेव। फुसनं लक्खणमेतस्साति **फुसनलक्खणो,** वेदनाय पच्चयभावट्ठेन आरम्मणफुसनलक्खणोति अत्थो। **संघट्टनरसो**ति मनोद्वारे चित्तारम्मणानं संघट्टनतो संघट्टनकिच्चो। अयञ्हि आरम्मणे अनल्लीयमानोपि रूपं विय चक्खुं, सद्दो विय च सोतं चित्तमारम्मणञ्च घट्टेति। पञ्चद्वारेसु वा वत्थारम्मणसंघट्टनेन सम्पज्जतीति संघट्टनसम्पत्तिको फस्सो **''संघट्टनरसो''**ति वुत्तो। यथा ''द्वे पाणी वज्जेय्यु''न्तिआदीसु पाणिम्हि घट्टनं तब्बिसेसभूता रूपधम्मा, एवं चित्तस्स आरम्मणे संघट्टनं तब्बिसेसभूतो एको चेतसिकधम्मो दट्ठब्बो। तिण्णं सन्निपातसङ्खातस्स अत्तनो कारणस्स वसेन पवेदितत्ता **सन्निपातपच्चुपट्ठानो**। ''चक्खुञ्च पटिच्च रूपे च उप्पज्जति चक्खुविञ्ञाणं, तिण्णं सङ्गति फस्सो''ति (म० नि० १.२०४,

४००; ३.४२१, ४२५; सं० नि २.४.६०; कथा० ४६५) हि वचनतो चक्खुरूपविञ्ञाणादीनं तिण्णं सन्निपातवसेन गहेतब्बताय उपट्ठानतो सन्निपातसङ्खातस्स कारणस्स वसेन उपट्ठानमस्साति उपट्ठानट्ठेन पच्चुपट्ठानेन सन्निपातपच्चुपट्ठानता वुत्ता। ''फस्सपच्चया वेदना''ति (विभ० २२५) वचनतो वेदना फलमस्साति **वेदनापच्चुपट्ठानो**। तज्जसमन्नाहारेन चेव इन्द्रियेन च परिक्खते विसये अनन्तरायेनेव उप्पज्जनतो **आपाथगतविसयपदट्ठानो**। अयञ्हि तस्स फस्सस्स कारणभूतो तदनुरूपभूतो समन्नाहारोति तज्जसमन्नाहारसङ्खातेन आवज्जनेन चेव चक्खादिइन्द्रियेन च यथाक्कमं आरम्मणकरणतदभिमुखभाववसेन परिक्खते अभिसङ्खाते आपाथगतेयेव विसये एकन्तेन उप्पज्जनतो आपाथगतो विसयो पदट्ठानं आसन्नकारणं इमस्साति आपाथगतविसयपदट्ठानो।

ननु चायं धम्मो चेतसिको, स्वायं अरूपधम्मो समानो कथं फुसनलक्खणो होतीति अन्तोलीनचोदनं मनसि कत्वा तस्सा सोधनत्थं ''**अरूपधम्मोपि समानो**''तिआदि वुत्तं। तत्थ ''**फुसनाकारेनेव पवत्तती**''ति इमिना अरूपस्सापि सतो तस्स धम्मस्स अयं सभावोति दस्सेति। सा च तस्स फुसनाकारप्पवत्ति अम्बिलं अम्बपक्कादिं खादन्तं पस्सन्तस्स परस्स खेळुप्पत्तिपरं बाधियमानं दिस्वा दयालुकस्स सरीरकम्पनं, रुक्खसाखग्गे दुट्ठितं पुरिसं दिस्वा भूमियं ठितस्स पुरिसस्स जङ्घचलनं, पिसाचादिभायितब्बं दिस्वा ऊरुपत्थम्भोति एवमादि विय दट्ठब्बा। **सो**ति सो यथावुत्तलक्खणादिको फस्सो।

सुन्दरन्ति सुखवेदनासम्पयुत्तत्ता पसत्थं। **मनो**ति विञ्ञाणं। **सुमनस्स भावो**ति सुमनसङ्खातस्स विञ्ञाणस्स भावो। य्वायं सद्दप्पवत्तिनिबन्धनो अत्थो, सो सोमनस्सं। सोमनस्सवेदनासम्पयुत्तत्ता हि सुमन-सद्दो तस्मिं विञ्ञाणे पवत्तति। वेदेन अनुभवनाकारेन अयितं पवत्तं वेदयितं, तं लक्खणमस्साति **वेदयितलक्खणा**। इट्ठस्स इट्ठाकारतोव अनुभवनं किच्चमस्साति **इट्ठाकारानुभवनरसा**। सा हि सभावतो इट्ठमारम्मणं इट्ठवसेन, इतरञ्च इट्ठाकारेनेव अनुभवति, तत्थ इट्ठाकारानुभवनं कुसलाकुसलचित्तसम्पयुत्तवेदनाय लब्भति तस्सा अनिट्ठस्सपि कप्पनावसेन इट्ठाकारेन गहणतो, सभावतो पन इट्ठानुभवनं अब्याकतचित्तसम्पयुत्तायपि लब्भति तस्सा विपल्लासग्गाहाभावतो। ''**राजा विय सुभोजनरस**''न्ति इमिना इमं दीपेति – फस्सस्स फुसनमत्तमेव होति, सञ्ञाय सञ्जाननमत्तमेव, चेतनाय सञ्चेतनामत्तमेव, विञ्ञाणस्स विजाननमत्तमेव, एकंसतो पन इस्सरवताय सामिभावेन वेदनाव आरम्मणरसं अनुभवति, राजा विय सूदकारेन सम्पादितसुभोजनरसन्ति। अस्सादीयतीति अस्सादो, सुखवेदना। तेनाह भगवा – ''यं, भिक्खवे, पञ्चुपादानक्खन्धे पटिच्च उप्पज्जति सुखं सोमनस्सं, अयं वुच्चति, भिक्खवे, पञ्चुपादानक्खन्धेसु अस्सादो''ति। चेतोसन्निस्सितत्ता चेतसि भवो अस्सादोति चेतसिकअस्सादो, तथा पच्चुपट्ठातीति **चेतसिकअस्सादपच्चुपट्ठाना**। पस्सद्धकायो सुखं वेदियतीति आह ''**पस्सद्धिपदट्ठाना**''ति। इदं पन निरामिससोमनस्सवसेन वेदितब्बं।

नीलादिभेदस्स आरम्मणस्स सञ्जाननं तमेव सञ्ञं कत्वा जाननं लक्खणं एतस्साति **सञ्जाननलक्खणा। पच्चाभिञ्ञाणकरणरसा**ति पति अभिञ्ञायति एतेनाति पच्चाभिञ्ञाणं, तदेवेतन्ति पुन पच्चाभिञ्ञाणनिमित्तं सण्ठानादिको आकारो, तस्स करणरसो किच्चमस्साति पच्चाभिञ्ञाणकरणरसा। सा हि उप्पज्जमाना पच्छा सञ्जाननस्स कारणभूतं सण्ठानादिकं आकारं गहेत्वा उप्पज्जतीति। इदञ्च निमित्तकारिकाय निमित्तेन सञ्जानन्तिया च सब्बाय समानसञ्ञाय योजेतब्बं। निमित्तेन सञ्जानन्तीपि हि पुन अपराय सञ्ञाय च सञ्जाननस्स निमित्तं करोतीति। तञ्च कुसलाकुसलकिरियाजवनसञ्ञं धुरं कत्वा वेदितब्बं। तं पनेतं अभिञ्ञाणकरणं कथं दट्ठब्बन्ति आह ''**वड्ढकिस्स अभिञ्ञाणकरणमिवा**''ति। यथा वड्ढकिस्स दारूसु ''इदं उद्धं, इदं अधो''ति एवं पच्छा सञ्जाननपच्चयभूतस्स सञ्ञाणस्स करणं, एवमस्सा पुन सञ्जाननपच्चयनिमित्तकरणन्ति वुत्तं होति। हत्थिदस्सकअन्धो विय ''इदमेव सच्च''न्ति सञ्ञाय यथागहितनिमित्तवसेन अभिनिवेसकरणतो **यथा...पे०... पच्चुपट्ठाना**। एतेन सञ्ञाय आकारग्गहणं कत्वा

ठितस्स दिट्ठिआदीनं उप्पज्जनतो अकुसलसञ्ञाय अनुरूपवसेन फलपच्चुपट्ठानं दस्सितं होति। अथ वा **अभिनिवेसकरण**न्ति ''इदमेव सच्च''न्ति सञ्ञाभिनिवेसमत्तमेव, तस्मा उपपरिक्खाभावेन यथागहितनिमित्तवसेन अभिनिवेसाकारेन उपट्ठानतो आकारपच्चुपट्ठानं वुत्तं। तिणपुरिसकेसु मिगपोतकानं ''पुरिसा''ति उप्पन्नसञ्ञा विय अविकप्पसभावत्ता **यथाउपट्ठितविसयपदट्ठाना**। एत्थ च ञाणविप्पयुत्तसञ्ञाय आकारग्गहणवसेन उप्पज्जनकाले चित्तं अब्बोहारिकं सञ्ञानुगतिकं होति। ञाणसम्पयुत्ते चित्ते पन ससम्भारपथविया अनुगता सेसधातुयो विय सञ्ञाचित्तञ्च अब्बोहारिकं ञाणानुगतिकं होति।

अभिसन्दहतीति पबन्धति पवत्तेति, ''गण्हथ गण्हथा''ति वदन्ती विय सम्पयुत्तधम्मे आरम्मणे पयोजेति, सकसककिच्चे च पट्ठपेतीति अत्थो। **चेतयितलक्खणा**ति निद्दोक्कन्तस्स पबुद्धक्खणे सम्भमप्पवत्ति विय चेतसो उस्साहताव लक्खणा। अथ वा **''अभिसन्दहती''**ति वुत्तत्ता पयोजनलक्खणात्वेव अत्थो। **आयूहनरसा**ति चेतसिकइरियनरसा, पयोगरसाति वुत्तं होति। कुसलाकुसलकिरियाजवनसम्पयुत्ताययेव पनेतं लब्भति। **संविदहनपच्चुपट्ठाना**ति ''त्वं इदं करोही''ति विचारेन्ती विय होतीति विचारणपच्चुपट्ठाना। एताय हि पवत्तमानाय सब्बेपि सम्पयुत्तधम्मा यथा सकिच्चपसुता होन्ति, तेनेव हेसा **सकिच्चपरकिच्चसाधिका** वुत्ता। जेट्ठसिस्सो परे सज्झायने उय्योजेन्तो सयम्पि सज्झायति। तस्मिञ्हि सज्झायितुं आरद्धे सेससिस्सापि सज्झायन्ति। महावड्ढकिस्मिम्पि वड्ढकिकम्मं कातुं आरद्धे इतरेपि करोन्ति येवाति आह **''जेट्ठसिस्समहावड्ढकिआदयो विया''**ति। **आदि**-सद्देन जेट्ठन्तेवासिकादीनं गहणं।

यथापच्चयं पवत्तमानानं धम्मानं नत्थि काचि वसवत्तिताति वसवत्तिभावनिवारणत्थं **''वितक्कनं वितक्को''**ति वुत्तं। ऊहनं आरम्मणस्स परिकप्पनं, तस्मिं अभिनिरोपनन्ति वा वुत्तं होति। यस्मा चित्तं वितक्कबलेन आरम्मणं अभिरुळ्हं विय होति, तस्मा वुत्तं **''आरम्मणे चित्तस्स अभिनिरोपनलक्खणो''**ति। यथा हि कोचि गामवासी पुरिसो राजवल्लभं, तंसम्बन्धिनं मित्तं वा निस्साय राजगेहं आरोहति अनुपविसति, एवं वितक्कं निस्साय चित्तं आरम्मणं आरोहति। यदि एवं कथं अवितक्कचित्तं आरम्मणं आरोहति, न हि द्विपञ्चविञ्ञाणदुतियज्झानादिके वितक्को उपलब्भति, यस्स बलेन तं आरम्मणं आरोहति, तस्मा सभावतो भावनाबलेन तत्थ अनुप्पज्जनको? सच्चं, तम्पि वितक्कबलेन आरोहति। यथा हि सो पुरिसो परिचयेन तेन विनापि निरासङ्को राजगेहं पविसति, एवं परिचयेन वितक्केन विनापि अवितक्कचित्तं आरम्मणं आरोहति। **परिचयो**ति चेत्थ सन्ताने अभिण्हं पवत्तचित्तभावनासङ्खातो परिचयो। वितक्कस्स हि सन्ताने अभिण्हं पवत्तस्स वसेन चित्तस्स आरम्मणाभिरोहनं चिरपरिचितं, तेन तं चित्तं कदाचि वितक्केन विनापि तत्थ वत्ततेव। यथा तं ञाणसहितं हुत्वा सम्मसनवसेन चिरपरिचितं कदाचि ञाणरहितम्पि सम्मसनवसेन पवत्तति, यथा वा किलेससहितं हुत्वा पवत्तं सब्बसो किलेसरहितम्पि परिचयेन किलेसवासनावसेन पवत्तति, एवंसम्पदमिदं दट्ठब्बं।

अथ वा द्विपञ्चविञ्ञाणं अवितक्कम्पि वत्थारम्मणघट्टनस्स बलवताय, दुतियज्झानादीनि च हेट्ठिमहेट्ठिमभावनाय बलवताय आरम्मणं आरोहतीति। आदितो, अभिमुखं वा हननं पहरणमत्तं आहननं, परितो, परिवत्तेत्वा वा हननं विसेसेन पहरणं परियाहननं, तं किच्चमस्साति **आहननपरियाहननरसो**। तथा हि तेन योगावचरो आरम्मणं वितक्काहतं वितक्कपरियाहतं करोतीति वुच्चति। आनयनं चित्तस्स आरम्मणे उपनयनं, आकड्ढनं वा, तथा हुत्वा पच्चुपट्ठानमस्साति **आनयनपच्चुपट्ठानो**।

तेनाति तेन विचारेन करणभूतेन, हेतुभूतेन वा चित्तं आरम्मणे विचरति अनुविचरति, अविचारचित्तस्स पन

अवितक्कचित्ते वुत्तानुसारेन पवत्ति वेदितब्बा। **विचरणं** अनुसञ्चरणं अनुपरिगमनं। स्वायं विसेसो सन्तानम्हि लब्भमानो जवनसन्ताने पाकटो होतीति दट्ठब्बो। एस नयो सेसेसुपि। आरम्मणस्स अनुमज्जनं अनुमसनं परिमज्जनमस्स लक्खणन्ति **आरम्मणानुमज्जनलक्खणो**। तथा हि विचारो परिमज्जनहत्थो विय, संसरणहत्थो वियाति वुच्चति। **तत्था**ति आरम्मणे। सहजातानं अनुयोजनं आरम्मणे अनुविचरणसङ्खातअनुमज्जनवसेन वेदितब्बं। धम्मानञ्हि सभावविनिमुत्ता काचि किरिया नाम नत्थि। तथागहेतब्बाकारो बोधनेय्यजनानुरोधेन परमत्थतो एकसभावोपि सभावधम्मो परियायवचनेहि विसयसमारोपितरूपेहि बहूहि पकारेहि पकासीयति। एवञ्हि सो सुट्ठु पकासितो होतीति। **अनुपबन्धपच्चुपट्ठानो**ति आरम्मणे चित्तस्स अविच्छिन्नस्स विय पवत्तिपच्चुपट्ठानो। तथा हि सो अनुसन्धानताति निद्दिट्ठो।

एत्थ च विचारतो ओळारिकट्ठेन तस्सेव पुब्बङ्गमट्ठेन पठमघण्टाभिरवो विय चेतसो पठमाभिनिपातो वितक्को, अनुरवो विय अनुसञ्चरणं विचारो। यथा हि घण्टाभिघातजो पठमाभिरवो अनुरवतो ओळारिको, पुब्बङ्गमो च होति, एवं आरम्मणाभिरोपनट्ठेन वितक्को ओळारिको, पुब्बङ्गमो विय च होति। ततो सुखुमट्ठेन अनुमज्जनसभावेन च घण्टानुरवो विय अनुपबन्धो विचारो। विप्फारवा चेत्थ वितक्को चित्तस्स पठमुप्पत्तिकाले चित्तस्स परिप्फन्दनभूतो आकासे उप्पतितुकामस्स सकुणस्स पक्खविक्खेपो विय, पदुमाभिमुखपातो विय च गन्धानुबन्धचेतसो भमरस्स। सन्तवुत्ति विचारो चित्तस्स नातिपरिप्फन्दनभावो, आकासे उप्पतितस्स सकुणस्स पक्खप्पसारणं विय, पदुमस्स उपरिभागे परिब्भमनं विय च पदुमाभिमुखपतितस्स भमरस्स। आगमट्ठकथायं पन विपरियायेन आगतं। तथा च वुत्तं **दुकनिपातट्ठकथायं** –

> ''आकासे गच्छतो महासकुणस्स उभोहि पक्खेहि वातं गहेत्वा पक्खे सन्निसीदापेत्वा गमनं विय आरम्मणे चेतसो अभिनिरोपनभावेन पवत्तो वितक्को, वातग्गहणत्थं पक्खे फन्दापयमानस्स गमनं विय अनुमज्जनभावेन पवत्तो विचारो''ति।

तम्पि अनुपबन्धेन पवत्तियं युज्जति। तथा हि उपचारे, अप्पनायं वा सन्तानेन पवत्तियं वितक्को निच्चलो हुत्वा आरम्मणं अनुपविसित्वा विय पवत्तति, न पठमाभिनिपाते विय पाकटो होतीति।

पिनयतीति कायचित्तं अप्पेति, वड्ढेति वा। **सम्पियायनलक्खणा**ति आरम्मणं कल्लतो गहणलक्खणा। **पीणनरसा**ति कायचित्तानं परिब्रूहनकिच्चा। **फरणरसा**ति पणीतरूपेहि कायस्स ब्यापनरसा, अत्तना सम्पयुत्तचित्तसमुट्ठानेहि रूपेहि सकलरूपकायब्यापनं करोतीति वुत्तं होति। न हि अञ्ञथा इमिस्सा फरणं होति, धम्मानं अब्यापारताय केसग्गमत्तम्पि सङ्कमनाभावतो। उदग्गभावो **ओदग्यं**।

एकं आरम्मणं अग्गमेतस्साति एकग्गं, चित्तं, येन पन धम्मेन योगतो तं एकग्गं नाम होति, सो **एकग्गभावो**। सो पन चित्तस्सेव होति, न यस्स कस्सचीति आह **''चित्तस्स एकग्गभावो''**ति, निवाते दीपसिखाय ठिति विय चित्तस्स ठितीति वुत्तं होति। विसारस्स ब्यग्गभावस्स पटिपक्खो सभावो अविसारो, न विसाराभावमत्तं, तं इमस्स लक्खणन्ति आह **''अविसारलक्खणो''**ति। **अविक्खेपो** सम्पयुत्तधम्मानं अविक्खित्तता, अविसाराविक्खेपानं समाधानभावतो अत्थतो विसेसाभावेपि समुखेन, सम्पयुत्तमुखेन च उभयं वुत्तन्ति दट्ठब्बं। अवूपसमलक्खणस्स विक्खेपस्स पटिपक्खताय चित्तस्स उपसमनाकारेन पच्चुपट्ठातीति **उपसमपच्चुपट्ठानो। विसेसतो**ति येभुय्येन। सुखविरहितोपि हि अत्थि समाधीति सो येभुय्येन सुखपदट्ठानो होति। अथ वा **विसेसतो**ति अतिसयेन। ''सुखिनो चित्तं समाधियती''ति (अ॰ नि॰ ११.११) वचनतो हि सुखं समाधिस्स विसेसकारणं सुखविरहितस्सपि तदुपनिस्सयेनेव समिज्झनतो।

सद्दहन्ति एतायाति कम्मफलादिसद्दहनकिरियाय पवत्तमानानं धम्मानं तत्थ आधिपच्चभावेन सद्धाय पच्चयतं दस्सेति। तस्सा हि धम्मानं तथा पच्चयभावे सति तंसमङ्गिपुग्गलो ''सद्दहती''ति वोहरीयति। सद्दहनं सद्धेय्यवत्थुनो पत्तियायनं, तं लक्खणमेतिस्साति **सद्दहनलक्खणा**। कालुसियमलं विधमेत्वा सम्पयुत्तानं, पुग्गलस्सेव वा पसादं अनाविलभावकारणं किच्चमेतिस्साति **पसादनरसा**। यथा कथं वियाति आह **''उदकप्पसादकमणि विया''**ति। **अकालुसियपच्चुपट्ठाना**ति अनाविलभावपच्चुपट्ठाना। रतनत्तयं कम्मं कम्मफलञ्च सद्धेय्यवत्थु, तं इमिस्सा आसन्नकारणन्ति **सद्धेय्यवत्थुपदट्ठाना**। न हि सद्धाय अवत्थुभूतेसु तित्थियादीसु सा उप्पज्जति। सा पनायं कुसलधम्मानं आदाने हत्थो विय, सब्बसम्पत्तिसम्पदाने वित्तं विय, अमतकसिफलफलने बीजं विय च दट्ठब्बा। ''सद्धाहत्थो, महानाम, अरियसावको, सद्धीध वित्तं पुरिसस्स सेट्ठं (सं॰ नि॰ १.२४६; सु॰ नि॰ १८४), सद्धा बीजं तपो वुट्ठी''तिआदिवचनञ्हेत्थ (सं॰ नि॰ १.१९७; सु॰ नि॰ ७७) साधकं।

सरन्ति २३७ **एताया**ति सरणकिरियाय पवत्तमानानं धम्मानं तत्थ आधिपच्चभावेन सतिया पच्चयतं दस्सेति। तस्सा हि धम्मानं तथा पच्चयभावे सति तंसमङ्गिपुग्गलो ''सरती''ति वोहरीयति। उदके अलाबु विय पिलवित्वा गन्तुं अदत्वा पासाणस्स विय निच्चलस्स आरम्मणस्स ठपनं असम्मुट्ठताकरणं अपिलापनं, तं लक्खणमस्साति **अपिलापनलक्खणा**। सा हि आरम्मणे दळ्हं पतिट्ठितत्ता एसिका विय वुच्चति। सम्मोसपच्चनीककिच्चं असम्मोसरसो, न सम्मोसाभावमत्तं। ''सतारक्खेन चेतसा विहरती''ति (अ॰ नि॰ १०.२०) वुत्तत्ता चेतोगुणरतनहारकानं किलेसचोरानं निवारणतो आह **''आरक्खपच्चुपट्ठाना''**ति। तथा हेसा चक्खुद्वारादिरक्खनतो दोवारिको वियाति वुच्चति। पठमं सञ्ञाय थिरुप्पन्नभावे पच्छा सतिया पतिट्ठानभावतो आह **''थिरसञ्ञापदट्ठाना''**ति। अथ सतिसञ्ञानं किं नानाकरणन्ति? सञ्ञा ताव पठमं अग्गहितनिमित्तं सञ्जानाति, गहितनिमित्ते पुन पच्चाभिञ्ञाणपच्चयनिमित्तं करोति, पठमं अग्गहिते पन सञ्ञाकिच्चं अप्पधानं होति, सति पन पठमं अग्गहितनिमित्तम्पि सरति गहितनिमित्तम्पि, गहितनिमित्ते पन सतिकिच्चं गुणभूतं होतीति इदमेव तासं नानत्तं।

वीरभावोति येन वीरियेन वीरो नाम होति, सो धम्मो। **वीरानं वा कम्म**न्ति येन कम्मेन वीरो नाम होति, तं वीरानं कम्मं नाम। वीरियं पनस्स साधकभावतो तथा वुत्तं। धम्मविनिमुत्तं वा किञ्चि कम्मं नत्थीति वीरियमेव कम्मभावेन वुत्तन्ति दट्ठब्बं। विधिना ईरेतब्बं पवत्तेतब्बन्ति वा **वीरियं**। **उस्साहो** तं तं किच्चं समारम्भो, परक्कमो वा। **उपत्थम्भनं** पन सम्पयुत्तधम्मानं कोसज्जपक्खे पतितुं अदत्वा धारणं अनुबलप्पदानं। सम्पयुत्तधम्मानं संसीदनभावनिवारको धम्मो, न संसीदनाभावमत्तं, असंसीदनभावेन पच्चुपट्ठातीति **असंसीदनभावपच्चुपट्ठानं**। ''संविग्गो योनिसो पदहती''ति (अ॰ नि॰ ४.११३) वचनतो **संवेगपदट्ठानं। संवेगो**ति चेत्थ संवेगमयं ञाणं। असंवेगपुब्बिकाय पन कुसलकिरियाय वीरियारम्भवत्थुपदट्ठानं। तत्थ **वीरियारम्भवत्थूनि** नाम –

> ''मग्गो गन्तब्बो होति, मग्गो गतो। कम्मं कातब्बं होति, कम्मं कतं। अप्पमत्तको आबाधो उप्पन्नो होति, गिलाना वुट्ठितो होति, अचिरवुट्ठितो गेलञ्ञा। गामं वा निगमं वा पिण्डाय चरन्तो न लभति, लूखस्स वा पणीतस्स वा भोजनस्स यावदत्थं पारिपूरिं लभति...पे॰... पारिपूरि''न्ति –

एवं वुत्तानि एतानि अनुरूपपच्चवेक्खणसहितानि अट्ठ वीरियारम्भवत्थूनि, तम्मूलकानि वा पच्चवेक्खणानि। एत्थ च वितक्को सम्पयुत्तधम्मे आरम्मणं आरोपेति। चेतना ते तंतंकिच्चेसु नियोजेति। वीरियं पन ते संसीदितुं अदत्वा उस्साहेतीति अयं वितक्कचेतनावीरियानं विसेसो।

विजाननलक्खणाति विसेसेन जाननलक्खणा, यथासभावपटिवेधलक्खणाति अत्थो। विसयस्स आरम्मणस्स ओभासनं पकासनं तप्पटिच्छादकसम्मोहन्धकारस्स विधमनतोति विसयोभासनं, तं किच्चमस्साति **विसयोभासनरसा**। कत्थचि विसये असम्मुय्हनाकारेन सम्मोहपटिपक्खताय वा पच्चुपट्ठानतो सम्मोहाभावस्स पच्चुपट्ठानतो वा **असम्मोहपच्चुपट्ठाना**।

अत्तना अनुपालेतब्बानं सहजातधम्मानं अनुपालनं जीवितस्स ब्यापारो, तञ्च तेसं जीवनन्ति तं तस्स कारणभावं पुरक्खत्वा वुत्तं **''जीवन्ति तेना''**ति। रूपारूपजीवितिन्द्रियस्स अनुरूपतो लक्खणादिकं दस्सेतुं **''अत्तना अविनिभुत्तान''**न्ति वुत्तं। ''सम्पयुत्तान''न्ति हि वुच्चमाने रूपधम्मानं सम्पयोगाभावतो रूपजीवितिन्द्रियस्स सङ्गहो न सिया। ''अविनिभुत्तान''न्ति पन वुत्तत्ता यानि अविनिब्भोगरूपानि रूपजीवितिन्द्रियेन सद्धिं अविनिभुत्तानि अविसंसट्ठानि। ये च अरूपधम्मा अरूपजीवितिन्द्रियेन सम्पयुत्ता, तेसं सब्बेसं सङ्गहो होतीति। **पवत्तनरस**न्ति उप्पादतो याव भङ्गा अनुपालनतो अन्तरा अनिवत्तनसभावसाधनेन तेसं पवत्तनकिच्चं। केचि पन ''रूपजीवितिन्द्रियं तेसं ठितिक्खणतो पट्ठाय, अरूपजीवितिन्द्रियं उप्पादतो पट्ठाय पवत्तिया पच्चयो''ति वदन्ति, तं न युत्तं। **पट्ठाने** हि ''अब्याकतं धम्मं पटिच्च असञ्ञसत्तानं एकं महाभूतं पटिच्च इन्द्रियपच्चयं कम्मपच्चयसदिस''न्ति असञ्ञसत्तानं इन्द्रियपच्चयो कम्मपच्चयसदिसं कत्वा वुत्तो, तस्मा रूपजीवितिन्द्रियम्पि उप्पादतो पट्ठाय पच्चयो होतीति दट्ठब्बं। उप्पादतो याव भङ्गा ठपनतो **ठपनपच्चुपट्ठानं**। अनुपालनवसेन यापयितब्बा पवत्तेतब्बा धम्मा पदट्ठानमस्साति **यापयितब्बधम्मपदट्ठानं**। यदि एवं तेसं अनुपालनादिसाधकं, कथं तेसं निरोधो होति। एवञ्हि सब्बकालं ठातब्बन्ति आह **''सन्तेपि चा''**तिआदि। **अनुपालनलक्खणादिम्ही**ति **आदि**-सद्देन पवत्तनरसादिमेव सङ्गण्हाति। **अत्थिक्खणेयेवा**ति अत्तना अनुपालेतब्बानं, अत्तनो वा अत्थिक्खणेयेव। **उदक**न्ति तळाकगतजलं, दण्डगतजलं वा। तत्थ तळाकगतउदकस्स गहणे अत्तना अनुपालेतब्बधम्मानं अत्थिक्खणे अनुपालनं साधितं होति, दण्डगतजलस्स पन गहणे अत्तनो अत्थिक्खणे अनुपालनं। अत्तना अनुप्पादितधम्मे कथं पालेतीति आह **''धाति विय कुमार''**न्ति। यदि सेसधम्मानं पवत्तिकारणेन केनचि भवितब्बं, जीवितस्स पन किं पवत्तिकारणन्ति आह **''सयं...पे०... पवत्तती''**ति। यथा कथं वियाति आह **''नियामको विया''**ति। सोपि अत्तना पवत्तितनावासम्बन्धेन पवत्तति। यदि धम्मानं पवत्ति जीवितिन्द्रियपटिबद्धं, भङ्गतो उद्धम्पि किं पन पवत्तेतीति आह **''न भङ्गतो उद्ध''**न्ति। कस्माति आह **''अत्तनो च पवत्तेतब्बानञ्च अभावा''**ति। भङ्गक्खणे पन कथन्ति आह **''न भङ्गक्खणे ठपेती''**ति।

यस्मा पन लोभपटिपक्खो अलोभो होति, ये धम्मा तेन सम्पयुत्ता, तंसमङ्गिनो वा सत्ता, ते न लुब्भन्ति, सयम्पि कदाचि न लुब्भतेव, अत्थतो वा अलुब्भनाकारो एव च सो होति, तस्मा वुत्तं **''न लुब्भन्ति तेना''**तिआदि। एस नयो **''न दुस्सन्ति तेना''**तिआदीसुपि। **अलग्गभावो** आरम्मणं निस्साय पवत्तन्तस्सपि तत्थ अनासत्तता। तेनाह **''कमलदले जलबिन्दु विया''**ति। **अपरिग्गहो** कस्सचि वत्थुनो ममत्तवसेन असङ्गहो। **मुत्तभिक्खु विया**ति खीणासवभिक्खु विय। सो हि मुत्तरागत्ता कत्थचि ममायनरहितो होति। अनल्लीनो भावो अधिप्पायो एतस्साति **अनल्लीनभावो**। एवञ्हि ''असुचिम्हि पतितपुरिसो विया''ति उपमाय समेति। यथा हि तस्स पुरिसस्स सतिपि कायेन अल्लीयने भावो अनल्लीनो, एवं अलोभोपि आरम्मणकरणवसेन गहितेपि आरम्मणे अलग्गभावेन अनल्लीनभावो अनल्लीनाकारोयेव पवत्तति। एवंसभावो हि सो धम्मोति।

चण्डिकस्स भावो चण्डिक्कं, फरुसभावो, अत्थतो पन कोपोयेव, तप्पटिपक्खो अफरुसभावो **अचण्डिक्कं।** **अविरोधो** अविग्गहो अप्पटिपक्खो सभावो। **आघातविनयनरसो**ति एत्थ **आघातो** नाम परस्स अत्तानं, अत्तनो परं

उद्दिस्स, परस्सेव च परं उद्दिस्स पवत्तो उपनाहो बलवकोपो। तस्स विनयनरसो अपनयनरसो। **सोम्मभावो** मज्जनवसेन हिलादनियता सीतलभावो। तेनाह **''पुण्णचन्दो विया''**ति।

कायदुच्चरीतादीहीति हेतुम्हि करणवचनं। **हिरीयति** लज्जनाकारेन जिगुच्छियति। **तेहियेवा**ति कायदुच्चरितादीहियेव। **ओत्तप्पती**ति उब्बिज्जति। हिरी पापे गूथे विय पस्सन्ती जिगुच्छतीति आह **''पापतो जिगुच्छनलक्खणा हिरी''**ति। ओत्तप्पं ते उण्हं विय पस्सन्तं ततो उत्तसतीति वुत्तं **''उत्तासलक्खणं ओत्तप्प''**न्ति। **उभोपि पापानं अकरणरसा**ति लज्जनाकारेन पापानं अकरणरसा हिरी, उत्तासाकारेन ओत्तप्पं। **पापतो सङ्कोचनपच्चुपट्ठाना**ति वुत्तप्पकारेनेव पापतो सङ्कोचनाकारेन पच्चुपट्ठाना। **अत्तगारवपरगारवपदट्ठाना**ति अत्तगारवपदट्ठाना हिरी अज्झत्तसमुट्ठानताय, अत्ताधिपतिताय च। परगारवपदट्ठानं ओत्तप्पं बहिद्धासमुट्ठानताय, लोकाधिपतिताय च। अत्तानञ्हि गरुं कत्वा हिरिया पापं पजहति कुलवधू विय। परं गरुं कत्वा ओत्तप्पेन पापं पजहति वेसिया विय। अज्झत्तसमुट्ठानादिता च नेसं तत्थ तत्थ पाकटभावेन वेदितब्बा, न पन तेसं कदाचि अञ्ञमञ्ञवियोगतो। न हि लज्जनं निब्भयं वा पापभयं वा अलज्जनं अत्थीति। हिरिया बलवभावे पन ओत्तप्पं अब्बोहारिकं होति, ओत्तप्पस्स बलवभावे हिरी अब्बोहारिका। इमे च द्वे धम्मा ''लोकपाला''ति वुच्चन्ति। यथाह –

> ''द्वेमे, भिक्खवे, सुक्का धम्मा लोकं पालेन्ति। कतमे द्वे? हिरी च ओत्तप्पञ्च, इमे खो, भिक्खवे, द्वे सुक्का धम्मा लोकं न पालेय्युं, नयिध पञ्ञायेथ 'माता'ति वा 'मातुच्छा'ति वा 'मातुलानी'ति वा''तिआदि (अ॰ नि॰ २.९)
> ।

पस्सम्भनं दरथवूपसमो, **काय**-सद्दो समूहवचनो। सो चेत्थ वेदनादिक्खन्धत्तयं। वत्तिच्छावसेन हि सद्दो विसिट्ठवुत्ति होतीति आह **''कायोति चेत्था''**तिआदि। **वेदनादयो**ति वेदनाक्खन्धो सञ्ञाक्खन्धो सङ्खारक्खन्धोति तयो खन्धा। तथा च वुत्तं तत्थ ''कतमा तस्मिं समये कायपस्सद्धि होति, या तस्मिं समये वेदनाक्खन्धस्सा''तिआदि (ध॰ स॰ ४०)। दरथो सारम्भो दोमनस्सपच्चयानं उद्धच्चादीनं किलेसानं, तथा पवत्तानं वा चतुन्नं खन्धानमेतं अधिवचनं। तस्स वूपसमं लक्खणमस्साति **कायचित्तदरथवूपसमलक्खणा। कायचित्त...पे॰... रसा**ति यथावुत्तानमेव पटिपक्खधम्मानं अभिभवनरसा। दरथनिम्मद्दनेन परिळाहपरिप्फन्दनविरहितो सीतिभावो **अपरिप्फन्दनसीतिभावो। अवूपसमो** परिप्फन्दनं असन्तवुत्तिता। **उद्धच्चादिकिलेसा**ति उद्धच्चप्पधाना उद्धच्चाधिकचित्तुप्पादसम्पयुत्ता किलेसा। तेपि हि उद्धच्चवसेन अवूपसमकरा। उद्धच्चं वा आदिं कत्वा सब्बेयेव किलेसा **उद्धच्चादिकिलेसा**। एवं सेसेसुपि।

गरुभावो दन्धता, थिनमिद्धाधिकानं तथा पवत्तानं वा चतुन्नं खन्धानमेतं अधिवचनं। दन्धताय पटिपक्खो **अदन्धता** अगरुभावो।

थद्धभावो थम्भो। दिट्ठिमानाधिकानं, तप्पधानानं वा चतुन्नं खन्धानं एतं नामं। थद्धभावनिम्मद्दनतोयेव कत्थचि आरम्मणे अप्पटिहताकारेन पच्चुपट्ठन्ति, सम्पयुत्तानं वा तत्थ अप्पटिघातं पच्चुपट्ठापेन्तीति **अप्पटिघातपच्चुपट्ठाना**।

कम्मनि साधु कम्मञ्ञं, न कम्मञ्ञं अकम्मञ्ञं, तस्स भावो **अकम्मञ्ञभावो,** दानसीलादिपुञ्ञकिरियाय असमत्थता। अत्थतो कामच्छन्दादिसंकिलेसधम्मा, तप्पधाना वा चत्तारो अकुसलक्खन्धा। अकम्मञ्ञभावनिम्मद्दनेनेव सम्पन्नाकारेन आरम्मणस्स गहणं **आरम्मणकरणसम्पत्ति**। वुत्तावसेसा कामच्छन्दादयो, तदेकट्ठा च संकिलेसधम्मा सेसनीवरणादयो। इमा पन द्वे विनिबन्धनिम्मद्दनेन पसादनीयवत्थूसु पसादावहा, हितकिरियासु विनियोगक्खमभावावहा

सुवण्णविसुद्धि वियाति दट्ठब्बा।

गेलञ्ञं अस्सद्धियादयो, तदेकट्ठा च पापधम्मा, तप्पटिपक्खो अगेलञ्ञभावो लक्खणं एतासन्ति **अगेलञ्ञभावलक्खणा**। गेलञ्ञनिम्मद्दनेनेव नत्थि एतासं आदीनवो दोसो उपद्दवो वा, न वा एता आदीनं कपणं वन्ति पवत्तन्तीति निरादीनवा, तेनाकारेन पच्चुपट्ठन्ति, तं वा सम्पयुत्तेसु पच्चुपट्ठापेन्तीति **निरादीनवपच्चुपट्ठाना**।

कायसम्बन्धी, चित्तसम्बन्धी च उजुभावोति लक्खितब्बताय **कायचित्तानं अज्जवलक्खणा**। कायचित्तानं नङ्गलसीसचन्दकोटिगोमुत्तवङ्कतासङ्खातानं कुटिलभावानं अत्थतो मायासाठेय्यादिभूतानं निम्मद्दनतो **कायचित्तानं कुटिलभावनिम्मद्दनरसा**। ततोयेव सब्बथापि अजिम्हभावेन पच्चुपट्ठन्ति, सम्पयुत्तानं वा अजिम्हतं पच्चुपट्ठापेन्तीति **अजिम्हतापच्चुपट्ठाना**।

ननु च कायपस्सद्धिआदीनं द्विन्नं द्विन्नं धम्मानं एकेकपटिपक्खत्ता दरथनिम्मद्दनादिकिच्चं एकेकमेव करोति। कस्मा पन द्वे द्वे धम्मा वुत्ताति? न खो पनेवं चिन्तितब्बं भगवतापि तथेव देसितत्ता। कस्मा पन भगवता तथा देसिता? सभावधम्मभावतो। न हि भगवता पुब्बे अविज्जमाना एते धम्मा देसनावसेन उप्पादिता, अथ खो सभावतो विज्जमानायेव सयम्भुञाणेन सम्मा सच्छिकत्वा यथासभावा देसिता, तस्मा कथमेत्थ भगवता सभावतो विज्जमानस्स हापनं कातुं सक्का। सभावतो विज्जमानताय चेत्थ भगवतो वचनमेव पमाणं। न हि भगवा यथाधम्मसासनाधिकारे अयथाधम्मं कथेय्याति, यस्स पन विज्जमानस्सापि अकथनं, तं अञ्ञहेतुकं। न चेत्थ तादिसो हेतु उपलब्भति, येन इमेसु एकेकधम्मस्स अकथनन्ति। यथा पन द्विन्नं पुरिसानं एकोयेव वेरिको होति, तस्स ते पुरिसा ओतारं दिस्वा एकतो हुत्वाव हनन्ति, एवमेव द्वे द्वे धम्मा एकतो हुत्वा एकं पटिपक्खधम्मं हनन्ति, यथा च पनेते विसुं दिस्वापि तं वेरिं हनन्ति, न एवमेते तं विसुं हनन्ति तेसं अञ्ञमञ्ञं अविनाभावतोति, तस्मा एते पटिपक्खधम्मानं एकेकभावेपि द्वे द्वेयेव वुत्ताति, अपिच चित्तपस्सद्धिआदीहि चित्तमेव पस्सद्धि लहु मुदु कम्मञ्ञं पगुणं उजुञ्च होति। कायपस्सद्धिआदीहि पन रूपकायोपीति तदत्थदस्सनत्थं भगवता एत्थेव दुविधता वुत्ता, न समाधिआदीसु।

छन्दनं **छन्दो,** आरम्मणेन अत्थिकता। ''छन्दो कामो''तिआदीसु (महानि० १) पन तण्हापि छन्दोति वुच्चति। ''छन्दं जनेति वायमती''तिआदीसु वीरियम्पीति ततो निवत्तनत्थं वुत्तं **''कत्तुकम्यतायेतं अधिवचन''**न्ति। कत्तुकम्यता वुच्चति करणिच्छा। चेतसिकस्स धम्मस्स सारम्मणत्ता करणिच्छा नाम आरम्मणस्स आलम्बितुकामतामुखेनेव होतीति आरम्मणकरणिच्छालक्खणो छन्दो **''कत्तुकम्यतालक्खणो''**ति वुत्तो। तेनेवाह ''आरम्मणपरियेसनरसो, आरम्मणेन अत्थिकतापच्चुपट्ठानो''ति च। यदग्गेन पनायं अत्तनो आरम्मणपरियेसनरसो, तदग्गेन सम्पयुत्तधम्मानम्पि होतियेव एकारम्मणताय। तेन तेसं आरम्मणग्गहणे चेतसो हत्थप्पसारणं वियाति वुच्चति। कथं पन दानवत्थुविस्सज्जनवसेन पवत्तमानचेतनासम्पयुत्तो छन्दो आरम्मणेन अत्थिको होतीति? ननु अवोचुम्हा ''आरम्मणकरणिच्छालक्खणो''ति, तस्मा सङ्गामगतइस्सासस्स खिपितब्बउसूनं गहणे अत्थिकता विय दानवत्थुविस्सज्जनवसेन पवत्तच्छन्दोपि विस्सज्जितब्बेन तेन अत्थिकोयेवाति। स्वायं कुसलेसु उप्पन्नो कुसलच्छन्दो नाम होति योनिसोमनसिकारसमुट्ठानत्ता। तब्बिपरीततो पन अकुसलेसु उप्पन्नो अकुसलच्छन्दो।

अधिमुच्चनं आरम्मणे सन्निट्ठानवसेन वेदितब्बं, न पसादनवसेन। तेनाह **''सन्निट्ठानलक्खणो''**ति। यथा तथा हि आरम्मणे निच्छयनं अधिमुच्चनं अनधिमुच्चन्तस्स पाणातिपातादीसु, दानादीसु वा पवत्तिया अभावतो, सद्धा पन पसादनीयेसु पसादाधिमोक्खोति अयमेतेसं विसेसो। वोट्ठब्बनं पन यथा सन्तीरिते अत्थे निच्छयनाकारेन पवत्तित्वा परतो

पवत्तमानानं तथा पवत्तिया पच्चयो होति। यदि एवं विचिकिच्छासम्पयुत्तेसु धम्मेसु कथन्ति? तेसम्पि एकंसेनेव संसप्पनाकारस्स पच्चयताय दट्ठब्बं, दारकस्स विय इतो चितो च संसप्पनस्स ''करिस्सामि, न करिस्सामी''ति अनिच्छयस्स पटिपक्खकिरिया असंसप्पनं। येसु चित्तुप्पादेसु अयं सन्निट्ठानलक्खणो अधिमोक्खो, तेसं आरम्मणधम्मोयेव सन्निट्ठातब्बत्ता सन्निट्ठेय्यधम्मो। सो पदट्ठानमस्साति **सन्निट्ठेय्यधम्मपदट्ठानो। इन्दखिलो**ति एसिकाथम्भो वुच्चति।

तेसु तेसु धम्मेसूति येसु धम्मेसु सयं उप्पन्ना, तेसु अत्तना सम्पयुत्तेसु चित्तचेतसिकधम्मेसु। अनारम्मणत्तेपि हि तेसु समप्पवत्तेसु उदासीनभावो **''तत्रमज्झत्तता''**ति वुच्चति। समं अविसमं वाहितं अत्तना पवत्तितसम्पयुत्तानं वा यथासककिच्चेसु पवत्तनं लक्खणमेतिस्साति **समवाहितलक्खणा**। तत्थ समं हुत्वा पवत्तनलक्खणाति अत्थे अपक्खपतितभावो वुत्तो होति, अविसमं कत्वा पवत्तनलक्खणाति अत्थे ऊनाधिकतानिवारणं। उदासीनभावेन पवत्तमानापि हि एसा सम्पयुत्तधम्मे समं कत्वा यथासककिच्चेसु पवत्तेति, यथा राजा तुण्ही निसिन्नोपि अधिकरणधम्मट्ठे यथासककिच्चेसु समं अप्पमत्ते पवत्तेति। अलीनानुद्धतप्पवत्तिपच्चयानं धम्मानं ऊनाधिकताय लीनुद्धतभावस्स निवारणकिच्चाति वुत्तं **''ऊनाधिकतानिवारणरसा''**ति। यदि एवं कथं सहजाताधिपतीनं अधिपतिभावो। आधिपच्चञ्हि तेसं किच्चतो अधिकभावोति? नायं दोसो। तम्पि तस्स किच्चमेव, यं सहजातधम्मानं अधिपतिभावे पवत्तापनं। यथा हि रङ्गमण्डलं गतो नटकाचरियो ते ते नटके यथासकं अनुरूपं भूमियं योजेति, एवमेसापि अत्तना सम्पयुत्तधम्मेसु अधिपतिभावे ठिते अधिपतिभावे योजेति, इन्द्रियत्ते ठिते इन्द्रियत्ते, न पन सकसककिच्चतो ऊनतं, अधिकतं वा पत्तुं देतीति। ''इदं निहीनकिच्चं होतु, इदं अतिरेककिच्च''न्ति एवं पक्खपातवसेन विय पवत्ति पक्खपातो। तं उपच्छिन्दन्ती विय होतीति **पक्खपातुपच्छेदनरसा**। सा चित्तचेतसिकानं अज्झुपेक्खनेन समप्पवत्तेसु आजानीयेसु सारथि विय दट्ठब्बा।

किरिया कारोति कार-सद्दस्स भावसाधनतं आह। तेन कारोति नाञ्ञं, किरियायेवाति दीपितं होति। **मनस्मिं कारो**ति मनसि आरम्मणस्स करणं। येन हि मनो आरम्मणे करीयति आरम्मणेनस्स संयोजनतो, ततो एव तेन आरम्मणम्पि मनसि करीयतीति। **मनसिकारो**ति चेत्थ अलुत्तसमासो दट्ठब्बो। **पुरिममनतो**ति भवङ्गमनतो। **विसदिसं मन**न्ति वीथिजवनमनं, तं करोतीति मनसिकारो, मनसिकारसामञ्ञेन वीथिजवनपटिपादके दस्सेति। एत्थ पन उपयोगत्थभुम्मवचने समासो दट्ठब्बो। सम्पयुत्तधम्मे आरम्मणाभिमुखं सारेन्तो पयोजेन्तो विय होतीति मनसिकारो **सारणलक्खणो**ति वुत्तो। **संयोजनरसो**ति पयोजनरसो। **वितक्को** सम्पयुत्तानं आरम्मणे अभिनिरोपनसभावत्ता आरम्मणे चित्तं पक्खिपन्तो विय होति। **चेतना** अत्तनो आरम्मणं गण्हन्ती सम्पयुत्तेपि सकसककिच्चं कारेतीति अत्तना करणेन बलं नियोजेन्तो बलनायको विय होति। **मनसिकारो** सम्पयुत्ते आरम्मणे पयोजेतीति आजानीयप्पयोजनकसारथि वियाति अयमेतेसं विसेसो।

आरम्मणाभिमुखभावपच्चुपट्ठानोति आरम्मणे संयोजनवसेन तदभिमुखभावपच्चुपट्ठानो। एत्थ **सतिया** अप्पमुस्सनच्छन्दता विसयाभिमुखपच्चुपट्ठानता, **मनसिकारस्स** पन संयोजनवसेनाति अयमेतेसं विसेसो। आरम्मणपटिपादकस्स सङ्खारक्खन्धपरियापन्नतावचनं इतरमनसिकारानं विञ्ञाणक्खन्धपरियापन्नतं दस्सेति। महिसासका पन ''आवज्जनस्स विञ्ञाणभावे सब्बञ्ञुतञ्ञाणस्स सब्बविसयता परिहायेय्य, तस्मा तं जवनसम्पयुत्तसङ्खारक्खन्धपरियापन्नमेवा''ति वदन्ति। तेसञ्हि अयमधिप्पायो — यदि तं विसुं चित्तसभावं सिया, पच्चुप्पन्नचित्तं आरम्मणं कत्वा पवत्तस्स तस्स अनन्तरं उप्पज्जमानजवनानं पच्चुप्पन्नारम्मणता न भवेय्य, अञ्ञदत्थु अतीतारम्मणताव सिया, एवञ्च सति सब्बञ्ञुतञ्ञाणस्सापि पच्चुप्पन्नचित्तारम्मणताय अभावतो असब्बविसयता आपज्जेय्य, यदग्गेन च तं असब्बविसयं, तदग्गेन सावरणम्पि होति यत्थ न पवत्तति, तत्थ आवरणसम्भवतो, तस्मास्स

सकललोकसिद्धो सब्बञ्ञुभावो, अनावरणभावो च परिहायेथ, जवनसम्पयुत्तभावे पन सति आवज्जनस्स नायं इट्ठविघातो आपज्जतीति। तयिदं तेसमभिनिवेसमत्तं ''आवज्जना कुसलानं खन्धानं, अकुसलानं खन्धानं अनन्तरपच्चयेन पच्चयो''ति (पट्ठा० १.१.४१७) वचनेन तस्सानन्तरं कुसलाकुसलुप्पत्तिया दीपितत्ता। सब्बञ्ञुतञ्ञाणस्स पन पच्चुप्पन्नचित्तारम्मणभावो एवं वेदितब्बो – अतीतादिवसेन हि विभागमकत्वा ''इमस्स चित्तं जानामी''ति पवत्तस्स आवज्जनं सामञ्ञेन यं किञ्चि अभिमुखीभूतं चित्तमावज्जति, ततो जवनानिपि अत्तनो अत्तनो अभिमुखीभूतं चित्तमारम्मणं कत्वा पवत्तन्ति, न चेत्थ जवनानं भिन्नारम्मणता आसङ्कितब्बा चित्तसामञ्ञेन आरम्मणस्स अभिन्नत्ता, तस्मा सब्बञ्ञुतञ्ञाणस्स पच्चुप्पन्नचित्तारम्मणतं पटिच्च न काचि विहेसा अनुभवितब्बाति। किं वा एतेन युत्तिवादेन, ननु वुत्तं भगवता – ''अचिन्तेय्यो बुद्धविसयो''ति (अ० नि० ४.७७), तस्मा अपरिमितपुञ्ञसम्भारेकफलस्स अचिन्तेय्यसभावत्ता आवज्जनेन विनापि विसयग्गहणे विबन्धनाभावतो यत्थ कत्थचि पवत्ति अप्पटिहतायेवाति। केचि पनेत्थ ''आवज्जनं अनागतचित्तमारम्मणं कत्वा निरुज्झति, जवनमेव पन पच्चुप्पन्नमारम्मणं गण्हाती''ति वदन्ति। यस्मा पन ''अनागतारम्मणा आवज्जना पच्चुप्पन्नारम्मणानं खन्धानं अनन्तरपच्चयेन पच्चयो''ति पाळि नत्थि, तस्मा तं अप्पमाणं।

करोतीति **करुणा**। किं करोति, केसं किं निमित्तन्ति आह **''परदुक्खे सति साधूनं हदयकम्पन''**न्ति। **कम्पन**न्ति च परेसं दुक्खं दिस्वा तस्स असहनाकारेन चित्तस्स अञ्ञथत्तं, तदिदं सप्पुरिसानंयेव होतीति आह **''साधून''**न्ति। सप्पुरिसा हि अत्तहितपरहितसाधनेन ''साधू''ति वुच्चन्ति। ''किणाती''ति इमस्स अत्थमाह **''विनासेती''**ति, अदस्सनं गमेति अपनेतीति अत्थो। तेनाह **''परदुक्खापनयनाकारप्पवत्तिलक्खणा''**ति। परेसं दुक्खस्स अपनयनं होतु वा, मा वा, सो परदुक्खापनयनाकारो, तथापवत्तिलक्खणाति **पर...पे०... लक्खणा**। अपनेतुकामताय परेसं दुक्खस्स असहनं अनधिवासनं **परदुक्खासहनं**। न विहिंसा अविहिंसा, सत्तानं अविहेठनं, तं पच्चुपट्ठापेति, विहिंसाय वा पटिपक्खभावेन पच्चुपट्ठातीति **अविहिंसापच्चुपट्ठाना**।

पमोदनलक्खणाति परसम्पत्तिया पमोदनलक्खणा। **अनिस्सायनरसा**ति इस्सायनस्स उसूयनस्स पटिपक्खभावकिच्चा। पन्तसेनासनेसु, अधिकुसलधम्मेसु च अरमणं अरति। सा अत्थतो इस्साधिकं दोमनस्ससहगतं, थिनमिद्धाधिकञ्च उद्धच्चं। तत्थ पुरिमं परसम्पत्तिविसयं, दुतियं पन्तसेनासनादिविसयन्ति दट्ठब्बं। अरतिया विहननाकारेन पच्चुपट्ठाति, तस्सा विघातं वा वूपसमं पच्चुपट्ठापेतीति **अरतिविघातपच्चुपट्ठाना। ''अनियते इच्छन्ती''**ति इमिना चेतसिकन्तरभावेन इच्छन्तीति दस्सेति।

कायदुच्चरितततोति वत्थुवीतिक्कमसङ्खातदुच्चरिततो। **कायदुच्चरितादिवत्थून**न्ति परपाणपरधनपरइत्थिआदीनं कायदुच्चरितादीनमालम्बणभूतानमेव वत्थूनं। **अवीतिक्कमलक्खणा**ति अमद्दनलक्खणा। कायदुच्चरितादिवत्थुतो सङ्कोचनकिरियापदेसेन कायदुच्चरितादितोयेव सङ्कोचनकिरिया वुत्ताति दट्ठब्बं। न हि विरतियो दुच्चरितवत्थुनो अकिरियपच्चुपट्ठाना युज्जन्ति, अथ खो दुच्चरितस्सेव, विरतीनञ्च सोरच्चवसेन सङ्कोचनं, अकिरिया च हिरोत्तप्पानं जिगुच्छादिवसेनाति अयमेतेसं विसेसो। **सद्धा...पे०... पदट्ठाना**ति एत्थ सद्धादयो सब्बेव धम्मा कायसुचरितादीनं पदट्ठानाति एके। अपरे पन ''कम्मं कम्मफलं सद्दहन्तस्स कायदुच्चरितादिअकरणतो, हिरोत्तप्पसम्पन्नस्स मुसावादादिअकथनतो, अप्पिच्छसन्तुट्ठीसल्लेखगुणसमन्नागतस्स मिच्छाजीवविवज्जनतो च सद्धादयो तिण्णं धम्मानं यथाक्कमेन पदट्ठाना''ति वदन्ति। **केची**ति अभयगिरिवासिनो। **इमासू**ति इमासु तीसु विरतीसु। **एकेकं नियतं विरतिमिच्छन्ती**ति अञ्ञं एकं चतुत्थनियतविरतिमिच्छन्ति। अथ वा निद्धारणत्थे भुम्मवसेन इमासं अन्तरे एकं नियतं

विरतिमिच्छन्तीति अत्थो। उभयथापि पन तेसं इच्छा न युज्जति अपराय विरतिया धम्मसेनापतिनापि अदेसितत्ता, विसयस्स च सदा सन्निहितत्ताभावेन नियताय एव एकिस्सा अभावतो। तेनेव हि अभयगिरिवासिनोयेव च केचि इमासं तिविधत्तं अनियतत्तमेव च इच्छन्ति। वुत्तञ्हि तेहि –

''करुणामुदिता सम्मावाचाकम्मन्तआजिवा।
येभुय्यतो अनियता, होन्ति गोचरभेदतो''ति॥ –

एत्थ पन ''येभुय्यतो''ति वचनं लोकुत्तरचित्तेसु सब्बदा एकतोयेव च लब्भमानतं सन्धाय वुत्तं।

दुतियचित्तेन सम्पयोगं गच्छन्तीति सम्बन्धो। यथा चित्तं, एवं तंसम्पयुत्तधम्मापीति दुतिये ससङ्खारा एवाति आह **''ससङ्खारभावमत्तमेव हेत्थ विसेसो''**ति। **तथा**ति यथा ततिये, तथा चतुत्थेपि पीतिया सुखपदट्ठानत्ता। सुखस्स चेत्थ अभावतो आह **''ठपेत्वा पीति''**न्ति। ननु च ''करुणामुदिता उपेक्खासहगते न सम्भवन्ती''ति वदन्ति, तस्मा यथा पीतिया, एवं तासम्पि पटिक्खेपो कातब्बोति? न कातब्बो, अप्पनापत्तितो पुब्बे करुणामुदितानं उपेक्खासहगतानम्पि सम्भवतो। करुणामुदिताभावनाकाले हि अप्पनावीथितो पुब्बे उपेक्खासहगतचित्तेनापि परिकम्मं होति, अप्पनावीथियं पन सोमनस्ससहगतचित्तेनेव एकावज्जनवीथिया वेदनापरिवत्तनाभावतो, तस्मा पुब्बभागवसेनेव करुणामुदितानम्पि उपेक्खासहगतेसु सम्भवो होतीति आचरिया। अपरे पन सब्बदापि तासं उपेक्खासहगतेसु सम्भवं न इच्छन्ति। ''अवसेसा पञ्चमेन सम्पयोगं गच्छन्ती''ति अविसेसेन वुत्तत्ता इदानि विसेसदस्सनत्थमाह **''सोमनस्सट्ठाने चा''**तिआदि।

८१. **करुणामुदितादयो**ति करुणामुदिता चेव विरतित्तयञ्च। तेनाह **''पञ्चा''**ति।

एवं कामावचरकुसलचित्तसम्पयुत्ते दस्सेत्वा इदानि रूपावचरकुसलचित्तसम्पयुत्तधम्मे दस्सेतुं **''अवसेसेसु पना''**तिआदिमाह। तत्थ **ठपेत्वा विरतित्तय**न्ति विरतित्तयं वज्जेत्वा। कस्मा पनेत्थ विरतित्तयं परिच्चत्तन्ति? वुच्चते – सुविसुद्धकायकम्मादिकस्स चित्तसमाधानवसेन रूपारूपावचरकुसलप्पवत्ति, न कायकम्मादीनं सोधनवसेन, नापि दुच्चरितदुराजीवानं समुच्छिन्दनवसेन। तथा हि नीवरणादिधम्मानं अवत्थत्तयं होति वीतिक्कमावत्था परियुट्ठानावत्था अनुसयावत्थाति। तत्थ वीतिक्कमावत्थाय पटिपक्खं कामावचरकुसलं परियुट्ठानावत्थाय रूपारूपावचरं, अनुसयावत्थाय लोकुत्तरकुसलं। दुच्चरितदुराजीवानं पन ठपेत्वा वीतिक्कमावत्थं, अनुसयावत्थञ्च वीतिक्कमावत्थाय विसुं परियुट्ठानावत्था न उपलब्भति। यस्सा विपच्चनीकं रूपारूपावचरकुसलं सिया, तस्मा तं नेव कामावचरकुसलं विय तेसं वीतिक्कमावत्थं सोधेति, न च लोकुत्तरं विय अनुसयावत्थं समुच्छिन्दति, पटिपस्सम्भेति वा। सीलविसुद्धियं सीलसोधनवसेन कामावचरकुसलेनेव विगतवीतिक्कमस्स परिसुद्धकायकम्मादिकस्स योगिनो चित्तसमाधानवसेन पवत्ततीति महग्गतचित्तुप्पादे विरतीनं असम्भवोयेव। इममेव हि अत्थं साधेतुं **''विरतियो पना''**तिआदि आरद्धं। **तेत्तिंस वा** करुणादिझानवसेन पवत्तनकाले। **ततो**ति ततो ततिये वुत्तचेतसिकतो। करुणामुदितानं अप्पनापत्तानमेकन्तसोमनस्ससहगतत्ता आह **''पञ्चमेन...पे०... करुणामुदितावज्जा''**ति।

रूपावचरपञ्चमे वुत्तनयेनाति तिंसेवाति अधिप्पायो। यदि एवं रूपावचरतो को विसेसोति आह **''अरूपावचरभावोवेत्थ विसेसो''**ति, पञ्चमे रूपसञ्ञाभावतो रूपावचरभावो, इध पन रूपसञ्ञासमतिक्कमेन पत्तब्बत्ता अरूपावचरभावोति अयमेवस्स ततो विसेसोति अत्थो।

पठमज्झानिकेति पठमज्झानवति। **मग्गचित्ते**ति चतुब्बिधेपि मग्गञाणे। **दुतियज्झानिकादिभेदे**ति दुतियततियचतुत्थपञ्चमज्झानिके। **वुत्तनयेना**ति ''दुतियेन वितक्कवज्जा''तिआदिना वुत्तनयेन। किं अविसेसेनाति चे, नोति आह **''करुणामुदितान''**न्तिआदि। मग्गधम्मेसु पादकज्झानादिवसेन कदाचि सम्मासङ्कप्पविरहो सिया, न पन विरतिविरहो, कायदुच्चरितादीनं समुच्छिन्नवसेनेव अरियमग्गस्स पवत्तनतोति आह **''नियतविरतिभावो''**ति। **लोकुत्तरभावो**ति छब्बिसुद्धिपरम्पराय पत्तब्बत्ता लोकतो उत्तरणभावो।

एवं कुसलचेतसिकानं सम्पयोगवचनत्थलक्खणादीनि दस्सेत्वा इदानि अकुसलचेतसिकानि दस्सेतुं **''अकुसला पना''**तिआदि आरद्धं। **छ येवापनका**ति किञ्चापि पठमे अनियतयेवापनका न लब्भन्ति, अकुसलेसु पन लब्भमानकयेवापनधम्मे एकत्थ दस्सेतुं तेसम्पि इधेव वचनं दट्ठब्बं। एवञ्च कत्वा उपरि धम्मानं उद्देसानन्तरं ''एवं येवापना''तिआदि वुत्तं। विचिकिच्छासहगते छन्दाधिमोक्खानं, उद्धच्चसहगते छन्दस्स च अभावतो वुत्तं **''पटिपाटिया दससु चित्तेसू''**ति।

८२. **निद्दिट्ठा**ति निस्सेसेन दस्सिता। हता विहता विद्धस्ता पापा अपायादिदुक्खपापनतो ''पापा''ति सङ्खाता अकुसलधम्मा येन सो भगवा **हतपापो,** तेन। लाभो अलाभो, यसो अयसो, निन्दा पसंसा, सुखं दुक्खन्ति इमेसु अट्ठसु लोकधम्मेसु अकम्पनट्ठेन **तादिना** सम्मासम्बुद्धेन। सो हि लाभादीसु यादिसो, अलाभादीसुपि तादिसोयेवाति ''तादी''ति वुच्चति।

न हिरीयतीति न लज्जति। **अहिरिको**ति पुग्गलो धम्मसमूहो वा। ''अहिरिक्क''न्ति वत्तब्बे एकस्स क-कारस्स लोपं कत्वा **''अहिरिक''**न्ति वुत्तं। **न ओत्तप्प**न्ति ओत्तप्पस्स पटिपक्खभूतं धम्ममाह। **अजिगुच्छनं** अहीळनं। **अलज्जनं** अविला। **अजिगुच्छनलक्खण**न्ति सभाववसेन वुत्तं, **अलज्जनलक्खण**न्ति कुसलाब्याकतस्स साधारणाय हिरिया पटिपक्खवसेन। **तेहेवा**ति कायदुच्चरितादीहि एव। **असारज्जनं** निब्भयता। **अनुत्तासो** असम्भमो। रसादीनि हिरिओत्तप्पेसु वुत्तपटिपक्खवसेन गहेतब्बानीति न तानि इध वुत्तानि। तेसु हि अलज्जनाकारेन पापानं करणरसं अहिरिकं। अनुत्तासाकारेन अनोत्तप्पं। वुत्तप्पकारेनेव पापतो असङ्कोचनपच्चुपट्ठानानि। अत्तनि, परेसु च अगारवपदट्ठानानि। गामसूकरस्स विय असुचितो किलेसासुचितो अजिगुच्छनं अहिरिकेन होति। सलभस्स विय अग्गितो पापतो अनुत्तासो अनोत्तप्पेन होति। यथाहु पोराणा –

''जिगुच्छति नाहिरिको, पापा गूथाव सूकरो।
न भायति अनोत्तप्पो, सलभो विय पावका''ति॥

एत्थ च यथा हिरिया बलवभावे ओत्तप्पं अब्बोहारिकं होति, ओत्तप्पस्स बलवभावे हिरी अब्बोहारिका, एवं अहिरिकस्स बलवभावे अनोत्तप्पं अब्बोहारिकं, अनोत्तप्पस्स बलवभावे अहिरिकं अब्बोहारिकं होतीति केचि, तं न युज्जति। यथा हि असुचिना अत्तानं मक्खेन्तो, सप्पमुखे हत्थं पवेसेन्तो बालदारको तत्थ पटिक्कूलभावस्स, आदीनवस्स च अनुपपरिक्खनतो नेव जिगुच्छति, न च उत्तसति, एवमेवं धम्मसभावस्स अञ्ञाणतो मोहो पापतो नेव जिगुच्छति, न उत्तसति, तस्मा तंसम्पयुत्तचित्तुप्पादे उभयम्पि बलवतरं होतीति।

लुब्भन्तीति अभिगिज्झन्ति, अल्लीयन्तीति वुत्तं होति। **आरम्मणग्गहणलक्खणो**ति एत्थ **आरम्मणग्गहणं** नाम ''मम इद''न्ति तण्हाभिनिवेसवसेन अभिनिविट्ठस्स आरम्मणस्स अविस्सज्जनं, न आरम्मणकरणमत्तं। **अभिसङ्गो**

अतिसयवताय आसत्तिया दुम्मोचनीयभावो। **अपरिच्चागो** अविजहनं। **तेलञ्जनरागो विया**ति धोवित्वापि परिच्चजितुं असक्कुणेय्यो तेलमक्खितअञ्जनरागो विय। ''अस्सादानुपस्सिनो तण्हा पवड्ढती''ति वचनतो वुत्तं **''अस्साददस्सनपदट्ठानो''**ति। तत्थ अस्सादवसेन दस्सनं अस्साददस्सनं। ननु च अस्साददस्सनम्पि अत्थतो लोभोयेवाति कथं सयं अत्तनो पदट्ठानं होतीति? सच्चं, पठमं नातिबलवलोभवसेन अस्साददस्सनो पच्छा बलवलोभो होतीति तस्स तंपदट्ठानता वुत्ता। तेनेव च ''तण्हा पवड्ढती''ति वुत्तं। अपरे पन ''अस्सादो नाम सुखवेदना, अस्साददस्सनन्ति अस्साददिट्ठी''ति वदन्ति। सुखवेदनाय वा कारणभूतं सुभनिमित्तं अस्सादो नाम, असुभे ''सुभ''न्ति पवत्ता तयो विपल्लासा अस्साददस्सनं नामाति केचि।

मुय्हन्तीति न बुज्झन्ति। धम्मसभावस्स याथावतो अदस्सनं **चित्तस्स अन्धभावो। अञ्ञाणं** ञाणपटिपक्खो धम्मो। तत्थ पुरिमलक्खणं सभाववसेन वुत्तं, इतरं पटिपक्खवसेन। अथ वा **अञ्ञाणलक्खणो**ति किच्चवसेन वुत्तं। सो हि असम्पटिवेधरसोति वुत्तो। धम्मसभावं पटिविज्झितुं असमत्थता **असम्पटिवेधो। आरम्मणसभावच्छादनरसो**ति यथा अञ्ञाणं, मोहसमङ्गिपुग्गलो वा आरम्मणसभावं पटिविज्झितुं न लभति, मोहस्स तथा पवत्ति आरम्मणसभावच्छादनं। एत्थ च ञाणं आरम्मणं यथासभावतो जानाति, दिट्ठि यथासभावं विजहित्वा अयाथावतो गण्हाति, मोहो पन न कथञ्चि विजानाति। यदि एवं आरम्मणग्गहणकालो कथं तदा सो आरम्मणं जानातेवाति? तदापि न जानाति। यथा पन फस्सादयो फुसनाकारादिमत्तवसेनेव आरम्मणं गण्हन्ति, न जाननवसेन, एवमयं आरम्मणं गहेत्वा उप्पज्जमानो पटिच्छादनाकारेनेव गण्हाति, न पन जाननाकारेनाति। यस्स उप्पज्जति, तस्स अन्धकरणं अन्धकारो, तथा पच्चुपट्ठाति, तं वा पच्चुपट्ठापेतीति **अन्धकारपच्चुपट्ठानो**।

मिच्छा पस्सन्तीति धम्मसभावस्स विपरीतवसेन अनिच्चादिं निच्चादिवसेन पस्सन्ति। **अयोनिसो अभिनिवेसो** उप्पथाभिनिवेसो। धम्मसभावं अतिक्कमित्वा परतो निच्चादितो वा परप्पच्चयतो वा आमसनं **परामासो,** विपरीतग्गाहवसेन ''इदमेव सच्चं, मोघमञ्ञ''न्ति अभिनिवेसनं **मिच्छाभिनिवेसो। अरियानं अदस्सनकामतादी**ति **आदि**-सद्देन सद्धम्मअसोतुकामतादिं सङ्गण्हाति।

यस्स धम्मस्स वसेन उद्धतं होति चित्तं, तंसम्पयुत्तधम्मा वा, सो धम्मो उद्धच्चं। तेनाह **''उद्धतभावो''**ति। **अवूपसमो**ति असन्निसिन्नभावो। **वाता...पे०... पटाका विया**ति यथा पटाका योत्तबलेन धजयट्ठिं अमुञ्चन्तीपि वाताभिघातेन एत्थ अवट्ठातुं न सक्कोति, एवमिदम्पि अधिमोक्खबलेन आरम्मणं अमुञ्चन्तम्पि अयोनिसोमनसिकारबलेन आरम्मणे अचलं अवट्ठातुं न सक्कोतीति वातप्पहारेनेव चलधजपटाका विय अनवट्ठानकिच्चं। **भन्तत्तं** परिब्भमनाकारो। उद्धच्चस्स सब्बाकुसलसाधारणत्ता, अञ्ञेसञ्च अकुसलसाधारणानं विसुं पदट्ठानस्स लब्भमानत्ता वुत्तं **''अयोनिसो...पे०... पदट्ठान''**न्ति। येनाकारेन वा मनसिकरोतो उद्धच्चं उप्पज्जति, तेनाकारेन मनसिकरणं इध **अयोनिसोमनसिकारो**। अथ वा उद्धच्चनिमित्तस्स आरम्मणस्स मनसिकरणं इध **अयोनिसोमनसिकारो**।

मञ्ञतीति अभिमञ्ञति, अहंकारं करोतीति अत्थो। सेय्यादिवसेन उच्चतो नमनं **उण्णति। सम्पग्गहरसो**ति उण्णतिवसेनेव अत्तनो, सम्पयुत्तधम्मानं वा सम्पग्गण्हनकिच्चो, न वीरियं विय तंतंकिच्चसाधनेन। अभिभुस्सहनवसेन हीनस्स अत्तानं नीचं कत्वा गहणम्पि पग्गण्हनवसेनेवाति वेदितब्बं। **केतु...पे०... पच्चुपट्ठानो**ति एत्थ केतु वुच्चति अच्चुग्गतधजो, इध पन केतु वियाति केतु, उळारतमादिभावो, तं केतुभावसङ्खातं केतुं कम्यतीति केतुकम्यं, यस्स धम्मस्स

वसेन तं केतुकम्यं, सो **केतुकम्यता**। ''अह''न्ति पवत्तनतो मानस्स दिट्ठिसदिसी पवत्ततीति दिट्ठिमाना एकचित्तुप्पादे न पवत्तन्ति, द्वे केसरसीहा विय एकगुहायं, तस्मा मानो दिट्ठिविप्पयुत्तचित्ते सब्बदा अनुप्पज्जमानोपि दिट्ठिसम्पयुत्तचित्ते नियमेन अनुप्पज्जनतो **दिट्ठिविप्पयुत्तलोभपदट्ठानो**। मानो धम्मसमूहग्गहणे बलवं हुत्वा अत्तुक्कंसनभावेन पवत्तति, दिट्ठि एकेकधम्मम्पि निच्चादिआकारेन गण्हन्ती पवत्तति। अत्तसिनेहसन्निस्सयो वा मानो, अत्तकिलमथानुयोगसन्निस्सया दिट्ठीति अयमेतेसं विसेसो।

इस्सतीति उसूयति। **तत्थेवा**ति परसम्पत्तीसुयेव। इस्सावसेन परसम्पत्तीसु अतुस्सनतो वुत्तं **''अनभिरतिरसा''**ति। तेनेवेतं वुच्चति –

''इस्सानलसिखा येसं, हदये जलतीध ते।
नेव विन्दन्ति पामोज्जं, सम्बुद्धादीहि सेवित''न्ति॥

अतिमहन्तादिभावो चस्स आपाथगतकाले उप्पज्जनकचित्तक्खणवसेन वेदितब्बो। तथा हि आपाथगतक्खणतो पट्ठाय याव सोळसचित्तक्खणा, ताव विज्जमानायुकआरम्मणं **अतिमहन्तं** नाम। पन्नरसचुद्दसचित्तक्खणायुकं **महन्तं** नाम। तेरसचित्तक्खणतो पट्ठाय अट्ठचित्तक्खणायुकं **परित्तं** नाम। ततो परं **अतिपरित्तं** नाम। तत्थ अतिमहन्तारम्मणे तदारम्मणपरियोसानानि वीथिचित्तानि उप्पज्जन्ति। महन्ते जवनपरियोसानानि, नत्थि तदारम्मणुप्पादो। परित्ते जवनम्पि न उप्पज्जति, सन्तीरणानन्तरं वोट्ठब्बनमेव द्वत्तिक्खत्तुं पवत्तति। अतिपरित्ते भवङ्गचलनमत्तमेव। कथं? अतिमहन्ते हि

आरम्मणे पञ्चद्वारेसु यथानुरूपं अञ्ञतरस्मिं द्वारे आपाथगते पसादघट्टनानुभावेन हदयवत्थुसन्निस्सिता भवङ्गसन्तति वोच्छिज्जति, वोच्छिज्जमाना च सहसा न ओच्छिज्जति। यथा पन वेगेन धावन्तो पुरिसो अन्तरा ठातुकामोपि एकद्वेपदवारे अतिक्कमित्वाव ठातुं सक्कोति, न पन ठातुकामताय सद्धिंयेव, एवमेव दीपसिखा विय, गङ्गासोतो विय, वेगेन जवमाना भवङ्गसन्तति अन्तरा ओच्छिज्जमानापि पसादघट्टनतो परं द्वत्तिक्खत्तुं उप्पज्जित्वाव ओच्छिज्जति। तत्थ पठमचित्तं भवङ्गसन्ततिया चलनाकारेन उप्पज्जनतो **भवङ्गचलनं** नाम, दुतियं उपच्छिज्जनवसेन उप्पज्जनतो **भवङ्गुपच्छेदो** नाम। **चलन**ञ्चेत्थ विसदिसचित्तस्स उपनिस्सयभावगमनं। वुत्तञ्च –

''आरम्मणन्तरापाथे, द्विक्खत्तुं चलिते मनो।
चित्तन्तरस्स हेतुत्तं, यानं चलनमीरित''न्ति॥

यदि एवं दुतियस्सपि तं अत्थीति तम्पि भवङ्गचलनमिच्चेव वत्तब्बन्ति? सच्चं, भवङ्गस्स पन उपच्छिज्जनवसेन पवत्तिविसेसं गहेत्वा पुरिमस्स नामतो विसदिसनामं कातुं ''भवङ्गुपच्छेदो''ति वुच्चतीति। ननु च रूपादीहि पसादे घट्टिते पसादनिस्सितस्सेव चलनं युत्तं, कथं पन हदयवत्थुसन्निस्सिताय भवङ्गसन्ततिया चलनन्ति? सन्ततिवसेन एकाबद्धत्ता। यथा हि भेरिया एकस्मिं तले ठितसक्खराय मक्खिकाय निपन्नाय अपरस्मिं तले दण्डादिना पहटे अनुक्कमेन भेरिचम्मवरत्तादीनं चलनेन सक्खराय चलिताय मक्खिकाय पलायनं होति, एवमेव रूपादिम्हि पसादे घट्टिते तन्निस्सयेसु महाभूतेसु चलितेसु अनुक्कमेन तंसम्बन्धानं सेसरूपानम्पि चलनेन हदयवत्थुम्हि चलिते तन्निस्सितस्स भवङ्गस्स चलनाकारेन पवत्ति होति। वुत्तञ्च –

''घट्टिते अञ्ञवत्थुम्हि, अञ्ञनिस्सितकम्पनं।
एकाबद्धेन होतीति, सक्खरोपमया वदे''ति॥ (स॰ स॰ १७६)।

एवं भवङ्गचलनभवङ्गुपच्छेदेसु उप्पज्जित्वा निरुद्धेसु ''किं नामेत''न्ति वदन्ती विय वीथिचित्तानि आरम्मणाभिमुखं पटिपादेन्ती किरियामनोधातु उप्पज्जति, तस्सानन्तरं यथारहं दस्सनादिकिच्चं साधयमाना पञ्चविञ्ञाणधातूसु अञ्ञतरा उप्पज्जति, तदनन्तरं ताय गहितमेवारम्मणं सम्पटिच्छमाना विपाकाहेतुकमनोधातु उप्पज्जति, तदनन्तरं तदेवारम्मणं सन्तीरयमाना विपाकाहेतुकमनोविञ्ञाणधातु उप्पज्जति, तदनन्तरं तमेवारम्मणं ववत्थापयमाना किरियाहेतुकमनोविञ्ञाणधातु उप्पज्जति, तदनन्तरं कामावचरकुसलाकुसलकिरियजवनेसु यं किञ्चि लद्धपच्चयं तदेवारम्मणं आरब्भ जवनं हुत्वा येभुय्येन सत्तक्खत्तुं जवति, तदनन्तरं एकादसतदारम्मणचित्तेसु अञ्ञतरं कम्मं आरम्मणं जवनं पच्चयो परिचितताति इमेसं अनुरूपवसेन द्विक्खत्तुं उप्पज्जति, तदनन्तरं भवङ्गपातो होति।

इध ठत्वा इमिस्सा चित्तपरम्पराय सुखग्गहणत्थं **अम्बोपमा** वेदितब्बा। कथं? एको किर पुरिसो फलितम्बरुक्खस्स हेट्ठा ससीसं पारुपित्वा निपन्नो निद्दायति, अथेकं अम्बपक्कं वण्टतो मुच्चित्वा तस्स कण्णसक्खलिं पुञ्छमानं विय ''ठ''न्ति भूमियं पतति, सो तस्स सद्देन पबुज्झित्वा सीसतो वत्थं अपनेत्वा चक्खुं उम्मीलेत्वा ओलोकेसि, ततो हत्थं पसारेत्वा फलं गहेत्वा मद्दित्वा उपसिङ्घित्वा पक्कभावं ञत्वा परिभुञ्जित्वा मुखगतं सह सेम्हेन अस्सादेत्वा पुन तथेव निद्दायति। तत्थ तस्स पुरिसस्स अम्बरुक्खमूले निद्दायनकालो विय भवङ्गसमङ्गिकालो, अम्बपक्कस्स पतितकालो विय आरम्मणस्स पसादघट्टनकालो, पतनसद्देन पबुद्धकालो विय मनोधातुया भवङ्गस्स आवट्टितकालो, उम्मीलेत्वा ओलोकितकालो विय चक्खुविञ्ञाणस्स दस्सनकिच्चं साधनकालो, हत्थं पसारेत्वा गहितकालो विय विपाकमनोधातुया आरम्मणसम्पटिच्छनकालो, गहेत्वा मद्दितकालो विय विपाकमनोविञ्ञाणधातुया आरम्मणस्स सन्तीरितकालो,

उपसिङ्घितकालो विय किरियामनोविञ्ञाणधातुया ववत्थापितकालो, परिभुत्तकालो विय जवनस्स आरम्मणरसअनुभवितकालो, मुखगतं सह सेम्हेन अस्सादितकालो विय तदारम्मणस्स जवनेन अनुभूतारम्मणअनुभवनकालो, पुन निद्दायनं विय पुन भवङ्गकालोति एवमेत्थ उपमासंसन्दनं वेदितब्बं।

अयं पन उपमा किं दीपेति? आरम्मणस्स पसादघट्टनमेव किच्चं, किरियामनोधातुया भवङ्गावट्टनमेव किच्चं, पञ्चविञ्ञाणधातूनं दस्सनादिकमेव किच्चं, विपाकमनोविञ्ञाणधातुया सम्पटिच्छनमेव किच्चं, विपाकमनोविञ्ञाणधातुया सन्तीरणमेव किच्चं, किरियामनोविञ्ञाणधातुया ववत्थापनमेव किच्चं, जवनस्सेव पन आरम्मणरसानुभवनं तदारम्मणस्स एतेन अनुभूतस्सेव अनुभवनन्ति एवं किच्चवसेन धम्मानं अञ्ञमञ्ञासंकिण्णतं दीपेति, एवं पवत्तमानं पन चित्तं ''त्वं आवज्जनं नाम होहि, त्वं दस्सनादीसु अञ्ञतरं, त्वं सम्पटिच्छनं नामा''तिआदिना नियुञ्जके कारके असतिपि चित्तनियामवसेनेव पवत्ततीति वेदितब्बं। तं पन चित्तनियामं सद्धिं उतुनियामादीहि परिच्छेदावसाने वक्खति। अयं ताव अतिमहन्तारम्मणे चित्तप्पवत्तिविभावना।

महन्तारम्मणे पन तदारम्मणुप्पादस्स अभावतो तस्मिं आपाथगते वुत्तनयेन जवनपरियोसानेसु वीथिचित्तेसु उप्पन्नेसु भवङ्गपातोव होति, आरम्मणस्स पन परिक्खीणायुकत्ता एकचित्तक्खणिकप्पमाणेपि वा आयुम्हि सति समासन्नमरणो विय पुरिसो दुब्बलभावतो तदारम्मणं नुप्पज्जति। अपिच तदारम्मणमुप्पज्जन्तं नियमतो द्विक्खत्तुमेव उप्पज्जति, न एकवारं। एकचित्तक्खणावसिट्ठे च आरम्मणे एकस्मिं तदारम्मणे उप्पन्नेसु दुतियस्स उप्पज्जनकाले तस्स निरुद्धत्ता नुप्पज्जति। न हि द्वीसु तदारम्मणेसु एकं पच्चुप्पन्नारम्मणं, एकं अतीतारम्मणं होति, तस्मा दुतियस्स अनुप्पत्तिया पठमम्पि नुप्पज्जतीति। **मज्झिमट्ठकथायं** पन सकिम्पि तदारम्मणस्स पवत्ति वुत्ता। **परमत्थविनिच्छयेपि** च तमेव वादं सम्पटिच्छित्वा ''सकिं द्वे वा तदालम्ब''न्ति (परम० वि० ११६) वुत्तं। **अभिधम्मट्ठकथायं** पन ''चित्तप्पवत्तिगणनायं सब्बवारेसु द्वे एव चित्तवारानि आगतानी''ति वत्वा तं न सम्पटिच्छितं, तस्मा महन्तारम्मणे जवनावसाने भवङ्गपातोव होति, नत्थि तदारम्मणुप्पादो, अयञ्च तदारम्मणेहि तुच्छताय ''**मोघवारो**''ति वुच्चति।

परित्तारम्मणे जवनुप्पादस्सपि अभावतो सन्तीरणावसानेसु वीथिचित्तेसु उप्पन्नेसु तदनन्तरं वोट्ठब्बनमेव आसेवनं लभित्वा जवनट्ठाने ठत्वा द्विक्खत्तुं पवत्तति, ततो भवङ्गपातो होति। वोट्ठब्बनं पन अप्पत्वा अन्तरा चक्खुविञ्ञाणादिकं पत्वा निवत्तिस्सतीति नेतं ठानं विज्जति। जवनं पन आरम्मणस्स अप्पायुकभावेन परिदुब्बलत्ता नुप्पज्जति। तञ्हि उप्पज्जमानं सत्तचित्तक्खणायुकेयेव उप्पज्जति, कतिपयचित्तक्खणायुके पन पठमजवनमेव नुप्पज्जति। तदनुप्पत्तियञ्हि इतरानिपि नुप्पज्जन्ति, तस्मा परित्तारम्मणे नत्थि जवनुप्पादोति अयं दुतियो मोघवारो अट्ठकथाय वुत्तो। टीकाकारो पन तथा असम्पटिच्छित्वा अञ्ञथा दुतियमोघवारं पकप्पेति। वुत्तञ्हि तेन तीसु मोघवारेसु दुतियमोघवारो उपपरिक्खित्वा गहेतब्बो।

यदि हि अनुलोमे वेदनात्तिके पटिच्चवारादीसु ''आसेवनपच्चया न मग्गे द्वे, नमग्गपच्चया आसेवने द्वे''ति च वुत्तं सिया, सोपि मोघवारो लब्भेय्य। यदि च वोट्ठब्बनम्पि आसेवनपच्चयो सिया, कुसलाकुसलानम्पि सिया। न हि आसेवनपच्चयं लद्धुं युत्तस्स आसेवनपच्चयभावी धम्मो आसेवनपच्चयो होतीति अवुत्तो अत्थि। वोट्ठब्बनस्स पन कुसलाकुसलानं आसेवनपच्चयभावो न वुत्तो। ''कुसलं धम्मं पटिच्च कुसलो धम्मो उप्पज्जति नासेवनपच्चया। अकुसलं धम्मं पटिच्च अकुसलो धम्मो उप्पज्जति नासेवनपच्चया''ति वचनतो पटिक्खित्तोव। अथापि सिया ''असमानवेदनानं वसेनेवं वुत्त''न्ति, एवम्पि यथा ''आवज्जना कुसलानं खन्धानं, अकुसलानं खन्धानं अनन्तरपच्चयेन पच्चयो''ति (पट्ठा० १.१.४१७) वुत्तं, एवं ''आसेवनपच्चयेन पच्चयो''तिपि वत्तब्बं सिया। जातिभेदा न वुत्तन्ति चे, ''भूमिभिन्नस्स

कामावचरस्स रूपावचरादीनं आसेवनपच्चयभावो विय जातिभिन्नस्सपि भवेय्या''ति वत्तब्बो एव सिया, अभिन्नजातिकस्स च वसेन यथा ''आवज्जना सहेतुकानं खन्धानं अनन्तरपच्चयेन पच्चयो''ति वुत्तं, एवं ''आसेवनपच्चयेन पच्चयो''तिपि वत्तब्बं सिया, न तु वुत्तं, तस्मा वेदनात्तिकेपि संखित्ताय गणनाय ''आसेवनपच्चया नमग्गे एकं, नमग्गपच्चया आसेवने एक''न्ति एवं गणनाय निद्धारियमानाय वोट्ठब्बनस्स आसेवनपच्चयत्ताभावा यथावुत्तप्पकारो दुतियो मोघवारो वीमंसित्वा गहेतब्बो। वोट्ठब्बनं पन वीथिविपाकसन्ततिया आवट्टनतो ''आवज्जना''इच्चेव वुत्तं। ततो विसदिसस्स जवनस्स करणतो मनसिकारो च। एवञ्च कत्वा पट्ठाने ''वोट्ठब्बनं कुसलानं खन्धानं अनन्तरपच्चयेन पच्चयो''तिआदि न वुत्तं, ''आवज्जना''इच्चेव वुत्तं, तस्मा वोट्ठब्बनतो चतुन्नं वा पञ्चन्नं वा जवनानं आरम्मणपुरेजातं भवितुं असक्कोन्तं रूपादिआवज्जनादीनं पच्चयो भवितुं न सक्कोति, अयमेतस्स सभावोति जवनापारिपूरिया दुतियो मोघवारो दस्सेतुं युत्तो सियाति।

अयञ्हि आचरियस्स अधिप्पायो – यदि वोट्ठब्बनम्पि आसेवनपच्चयो सिया, यथा ''सुखाय वेदनाय सम्पयुत्तं धम्मं पटिच्च सुखाय वेदनाय सम्पयुत्तो धम्मो उप्पज्जति आसेवनपच्चया नमग्गपच्चया''ति अनुलोमपच्चनिये, पच्चनियानुलोमे च ''सुखा...पे०... नमग्गपच्चया आसेवनपच्चया''ति च वुत्तं हसितुप्पादचित्तवसेन, एवम्पि वोट्ठब्बनवसेन ''अदुक्खमसुखाय वेदनाय सम्पयुत्तं धम्मं पटिच्चा''तिआदिना पुब्बे वुत्तनयेन पाठो सिया। तथा च सति वारद्वयवसेन गणनाय ''आसेवनपच्चया नमग्गे द्वे, नमग्गपच्चया आसेवने द्वे''ति च वत्तब्बं सिया, न पन वुत्तं, ''आसेवनपच्चया नमग्गे एकं, नमग्गपच्चया आसेवने एक''न्तिच्चेव वुत्तं। अपिच यदि हि वोट्ठब्बनम्पि आसेवनपच्चयो सिया, दुतियमोघवारो विय पुरिमवारेसुपि सिया। तथा च सति अत्तनो विय कुसलाकुसलानम्पि सिया। न हि आसेवनपच्चयं लद्धुं युत्तस्स आसेवनपच्चयभावी धम्मो आसेवनपच्चयो होतीति अवुत्तो अत्थि ''पुरिमा पुरिमा कुसला खन्धा''तिआदिना अनवसेसतो वुत्तत्ता, वोट्ठब्बनस्स पन अवुत्तो ''अब्याकतो धम्मो कुसलस्स धम्मस्स आसेवनपच्चयेन पच्चयो''तिआदिवचनस्स अभावतो। न केवलं अवुत्तोव, अथ खो ''कुसलं धम्मं पटिच्च कुसलो धम्मो उप्पज्जति, अकुसलं धम्मं पटिच्च अकुसलो धम्मो उप्पज्जती''ति फस्सादिकुसलाकुसलधम्मे पटिच्च सहजातादिपच्चयवसेन कुसलाकुसलस्स उप्पत्तिं वत्वा पठमजवनस्स वोट्ठब्बनतो आसेवनपच्चयालाभं सन्धाय ''नासेवनपच्चया''ति पटिक्खित्तोव।

अथापेत्थ समोधानं सिया, समानवेदनानं एव आसेवनपच्चयभावस्स दस्सनतो वोट्ठब्बनेन असमानवेदनानं कुसलाकुसलानं वसेनायं पटिक्खेपो कतोति। एवम्पि सति यथा ''आवज्जना कुसलानं खन्धानं अकुसलानं खन्धानं अनन्तरपच्चयेन पच्चयो''ति वुत्तं, एवं समानवेदनावसेन ''आसेवनपच्चयेन पच्चयो''तिपि वत्तब्बं सिया। अथ वोट्ठब्बनस्स कुसलाकुसलेहि भिन्नजातिकत्ता तस्स तेसं आसेवनपच्चयभावो न वुत्तोति चे। यथा भूमिवसेन भिन्नस्स गोत्रभुवोदानवसेन ठितस्स कामावचरस्स रूपावचरादीनं आसेवनभावो दिस्सति, एवं जातिवसेन भिन्नस्स वोट्ठब्बनस्स आसेवनपच्चयभावे न कोचि विबन्धो, अपिच अभिन्नवेदनस्स, अभिन्नजातिकस्स च उपेक्खासहगतमहाकिरियचित्तस्स वसेन यथा ''आवज्जना सहेतुकानं खन्धानं अनन्तरपच्चयेन पच्चयो''ति वुत्तं, एवं ''आसेवनपच्चयेन पच्चयो''तिपि वत्तब्बं सिया, न तु वुत्तं, तस्मा वेदनात्तिकेपि वोट्ठब्बनस्स आसेवनपच्चयत्तस्स अभावा वोट्ठब्बनस्स आसेवनभावदस्सनवसेन वुत्तो दुतियो मोघवारो वीमंसित्वा गहेतब्बो। वोट्ठब्बनावज्जनानं पन अनत्थन्तरभावतो आवज्जनाय च कुसलाकुसलानं अनन्तरपच्चयभावस्स वुत्तत्ता सति उप्पत्तियं वोट्ठब्बनं कामावचरकुसलाकुसलकिरियाजवनानं एकन्ततो अनन्तरपच्चयभावेनेव वत्तेय्य, न पन अञ्ञथाति मुच्छामरणासन्नवेलादीसु जवनापारिपूरिया मन्दीभूतवेगताय अयं दस्सेतब्बोति।

आचरियधम्मपालत्थेरेन पनेत्थ इदं वुत्तं – ''यं जवनभावप्पत्तं, तं छिन्नमूलरुक्खपुप्फं विया''ति वक्खमानत्ता अनुपच्छिन्नभवमूलानं पवत्तस्स वोट्ठब्बनस्स किरियभावो न सिया, वुत्तो च ''यस्मिं समये मनोविञ्ञाणधातु उप्पन्ना किरिया नेवकुसला, नाकुसला, न च कम्मविपाका उपेक्खासहगता''ति, तस्मा अट्ठकथायं ''जवनट्ठाने ठत्वा''ति वचनं जवनस्स उप्पज्जनट्ठाने द्विक्खत्तुं पवत्तित्वा न जवनभावेनाति अधिप्पायेन वुत्तं, ''आसेवनं लभित्वा''ति च ''आसेवनं विय आसेवन''न्ति वुत्ते न कोचि विरोधोति। विप्फारिकस्स पन सतो द्विक्खत्तुं पवत्तियेवेत्थ आसेवनसदिसता। विप्फारिकताय हि विञ्ञत्तिसमुट्ठापकत्तञ्चस्स वुच्चति। विप्फारिकम्पि जवनं विय अनेकक्खत्तुं अप्पवत्तिया दुब्बलत्ता न निप्परियायतो आसेवनपच्चयभावेन पवत्तेय्याति न इमस्स पाठे आसेवनत्तं वुत्तं। अट्ठकथायं पन परियायतो वुत्तं, यथा फलचित्तेसु मग्गङ्गं मग्गपरियापन्नन्ति। यदिपि ''जवनापारिपूरिया...पे॰... युत्तो''ति वुत्तं, ''आवज्जनादीनं पच्चयो भवितुं न सक्कोती''ति पन वुत्तत्ता चित्तप्पवत्तिवसेन पठममोघवारतो एतस्स न कोचि विसेसोति।

चक्खुस्सापाथमागतेति चक्खुद्वारस्स योग्यदेसावट्ठानवसेन आपाथमागते। **ताया**ति मनोधातुया भवङ्गावट्टने पाकटताय किरियामनोधातुं पच्चामसति। **आवट्टिते**ति सन्ततिवसेन पवत्तितुं अदत्वा निवत्तिते, परिणामिते वा। जातेसु जायतेति सम्बन्धो। **गते**ति निरुद्धे। **तदेवा**ति जवनानुभूतमेव इट्ठारम्मणं। **तेनेवा**ति जवनं हुत्वा निरुद्धेन तेन कामावचरकुसलचित्तेन। **तदारम्मणसञ्ञित**न्ति जवनग्गहितेयेव आरम्मणे पवत्तनतो ''ब्रह्मस्सरो''तिआदीसु विय तस्स आरम्मणं आरम्मणमस्साति मज्झपदलोपवसेन तदारम्मणन्ति सञ्ञितं। **तुल्यतो**ति आरम्मणतो विसदिसभावेपि सोमनस्ससहगतादिना सदिसत्ता। मूलसदिसं भवङ्गं **मूलभवङ्गं**। तदारम्मणम्पि भवङ्गसभावत्ता ''भवङ्ग''न्ति वुच्चति यथा ''सहेतुकं भवङ्गं अहेतुकस्स भवङ्गस्स अनन्तरपच्चयेन पच्चयो''ति (पट्ठा॰ ३.१.१०२)। एत्थ हि पटिसन्धिचित्ते एव पवत्तियं ''भवङ्ग''न्ति वुच्चमाने न तस्स हेतुवसेन भेदोति ''सहेतुकं भवङ्गं अहेतुकस्स भवङ्गस्स अनन्तरपच्चयेन पच्चयो''ति न सक्का वत्तुं। नापि चेतं ''सहेतुकं चुतिं अहेतुकपटिसन्धिञ्च सन्धाय वुत्त''न्ति सक्का विञ्ञातुं। भवस्स अङ्गभावाभावतो चुतिचित्तस्स भवङ्गवोहारालाभतोति ''सहेतुकं भवङ्ग''न्ति तदारम्मणं वुत्तन्ति विञ्ञायति। ''तदारम्मणसञ्ञित''न्ति वत्वा ''मूलभवङ्गन्ति वुच्चती''ति वुत्तत्ता नामद्वयम्पि इमस्स लब्भतीति दीपितं होति।

३९२. तञ्चाति तदारम्मणञ्च। **एत्था**ति इमेसु वीथिचित्तेसु। **गणनूपगचित्तानी**ति विपाकगणनूपगचित्तानि।

३९४. असमानत्ताति असङ्खारिकभावेन असमानत्ता।

३९६. पुरिमानि पञ्च विपाकचित्तानि इमिना सद्धिं छ होन्तीति सम्बन्धो। एत्थ च येभुय्यतो इट्ठारम्मणे सोमनस्सप्पवत्तिवसेन सोमनस्ससहगतजवनानन्तरमेव सोमनस्सतदारम्मणं वुत्तं। जवनस्स पन पकप्पेत्वा आरम्मणग्गहणसब्भावतो, विपाकस्स च तदभावतो इट्ठारम्मणे उपेक्खासहगतजवनेसुपि जवितेसु सोमनस्ससहगतमेव तदारम्मणं होति।

३९९-४०३. तस्मिं द्वारेति तस्मिंयेव चक्खुद्वारे। **वेदना परिवत्तती**ति कम्मस्स सोमनस्ससहगतभावेपि आरम्मणस्स इट्ठमज्झत्तताय सोमनस्सवेदना परिवत्तित्वा उपेक्खावेदना होति। अथ वा हेट्ठा विपाकवेदनाय सोमनस्सभावेपि इट्ठारम्मणस्स मज्झत्तभावेन तंवसेन वेदना परिवत्ततीति अत्थो।

जवनेसु जवितेसूति सम्बन्धो। ''जवितेसु चतूस्वपी''ति वा पाठो। **जायरे**ति तदारम्मणवसेन जायन्ति। **वेदनाया**ति वेदनाय करणभूताय। **असमानत्ता**ति पटिसन्धिया सह असमानत्ता। **पुरिमेही**ति हेट्ठा वुत्ततदारम्मणचतुक्कतो। अथ वा

''पुरिमेहि असमानत्ता'' इच्चेव योजना। पुरिमेहि सह असमानभावे वुत्ते तेसं सन्धिया सह असमानभावोपि वुत्तोव होतीति चत्तारि नामतो पिट्ठिभवङ्गानि च होन्तीति योजना। **च**-सद्देन आगन्तुकभवङ्गानि, तदारम्मणानि च होन्तीति दस्सेति। एत्थापि च येभुय्येन इट्ठमज्झत्तारम्मणे उपेक्खासहगतजवनस्स उप्पज्जनतो उपेक्खासहगतजवनानन्तरमेव उपेक्खासहगततदारम्मणं वुत्तं, हेट्ठा वुत्तनयेन पन उपेक्खासहगततदारम्मणं होति। ञाणसम्पयुत्तादीसु जवितेसु ञाणविप्पयुत्ततदारम्मणानं सम्भवो हेट्ठा वुत्तनयेन वेदितब्बो। किञ्चापि असङ्खारससङ्खारविधानं जवनवसेन वुत्तं, तथापि उतुभोजनादिपच्चयानं दुब्बलभावे जवनस्सेव असङ्खारिकत्ताभावतो असङ्खारजवनावसाने असङ्खारमेव तदारम्मणं होति, न ससङ्खारन्ति नियमो। पच्चयस्स पन बलवभावे सतिपि परेसं उस्साहबलेन ससङ्खारस्स जवनस्स सम्भवतो ससङ्खारजवनावसाने ससङ्खारमेव तदारम्मणं होति, ससङ्खारिकत्ताभावतो असङ्खारजवनावसाने असङ्खारमेवाति नियमो नत्थीति असङ्खारजवनावसाने असङ्खारम्पि ससङ्खारम्पि तदारम्मणं होति, ससङ्खारजवनावसाने ससङ्खारम्पि असङ्खारम्पि तदारम्मणं होति।

पच्छिमानीति इट्ठमज्झत्तारम्मणे वुत्तानि उपेक्खासहगतसन्तीरणादीनि पञ्च विपाकानि। **पुरिमेहि सत्तही**ति इट्ठारम्मणे वुत्तेहि चक्खुविञ्ञाणादीहि सत्तहि विनिद्दिसे चक्खुद्वारस्मिन्ति अधिप्पायो।

४०५-६. एकाय चेतनायाति एकाय तिहेतुकसोमनस्ससहगतअसङ्खारिकचेतनाय। एवं समसट्ठि विपाकानि उप्पज्जन्तीति सम्बन्धो। यस्मा पन चक्खुद्वारादीसु अनुप्पज्जित्वा सोतद्वारादीसुयेव उप्पज्जमाना सोतविञ्ञाणादयो विय पञ्चसु द्वारेसु अनुप्पज्जित्वा मनोद्वारेयेव उप्पज्जमानो कामावचरविपाको नत्थि, तस्मा मनोद्वारे विपाकप्पवत्ति न वुत्ता। अथ वा चक्खुद्वारे गहितानमेव मनोधातुमनोविञ्ञाणधातूनं सोतद्वारादीसुपि गहणेन पञ्चद्वारेसु गहिताय मनोविञ्ञाणधातुया मनोद्वारेपि गहणनयदस्सनं कतं होति, एवं सति छसु द्वारेसुपि समसत्तति विपाकानि होन्ति। अथ वा मनोद्वारे लब्भमानायपि पञ्चद्वारप्पवत्ताय मनोविञ्ञाणधातुया मनोद्वारे अग्गहणेन सोतद्वारादीसु लब्भमानानम्पि चक्खुद्वारे गहितमनोधातुमनोविञ्ञाणधातूनं सोतद्वारादीसु अग्गहणस्स नयदस्सनं कतं होति, एवं सति पञ्चद्वारेसु सोळस विपाकानि होन्ति। एवञ्च कत्वा वुत्तं ''**गहितागहणेना**''तिआदि।

४०८-९. तीहि विपाकेहीति तेहि तीहि कुसलचित्तेहि समानेहि तीहि विपाकेहि दिन्नाय पटिसन्धियाति सम्बन्धो। **उपेक्खासहितद्वये**ति उपेक्खासहगतपटिसन्धियुगळे। इध ठत्वा नाळियन्तूपमा वेदितब्बा। कथं? उच्छुपीळनसमये किर एकस्मा गामा एकादस यन्तवाहा निक्खमित्वा एकं उच्छुवाटं दिस्वा तस्स परिपक्कभावं ञत्वा उच्छुसामिकं उपसङ्कमित्वा ''यन्तवाहा मय''न्ति आरोचेसुं। सो ''अहं तुम्हेयेव परियेसिस्सामी''ति उच्छुसालं गहेत्वा अगमासि। ते तत्थ नाळियन्तं योजेत्वा ''मयं एकादस जना अपरम्पि एकं लद्धुं वट्टति, वत्तनेन गण्हथा''ति आहंसु। उच्छुसामिको ''अहमेव सहायो भविस्सामी''ति उच्छुसालं पूरापेत्वा तेसं सहायो अहोसि। ते अत्तनो अत्तनो किच्चानि कत्वा फाणितपाचकेन उच्छुरसे पक्के गुळे बद्धे उच्छुसामिकेन तुलयित्वा भागेसु दिन्नेसु अत्तनो अत्तनो भागं आदाय सालं सालसामिकं पटिच्छापेत्वा एतेनेव उपायेन अपरासुपि चतूसु सालासु कम्मं कत्वा पक्कमिंसु। तत्थ पञ्च यन्तसाला विय पञ्च पसादा दट्ठब्बा, पञ्च उच्छुवाटा विय पञ्च आरम्मणानि, एकादस विचरणकयन्तवाहा विय एकादस विपाकचित्तानि, पञ्च उच्छुसालसामिनो विय पञ्च विञ्ञाणानि, पठमकसालाय सालसामिकेन सद्धिं द्वादसन्नं जनानं एकतो हुत्वा कतकम्मानं भागग्गहणकालो विय एकादसन्नं विपाकचित्तानं चक्खुविञ्ञाणेन सद्धिं एकतो हुत्वा चक्खुद्वारे रूपारम्मणे सकसककिच्चकरणकालो, सालसामिकस्स सालाय सम्पटिच्छितकालो विय चक्खुविञ्ञाणस्स द्वारसङ्कन्तिअकरणं, दुतियततियचतुत्थपञ्चमसालाय द्वादसन्नं एकतो हुत्वा कतकम्मानं भागग्गहणकालो विय एकादसन्नं विपाकचित्तानं कायविञ्ञाणेन सद्धिं एकतो हुत्वा

कायद्वारे फोट्ठब्बारम्मणे सकसककिच्चकरणकालो, सामिकस्स सम्पटिच्छितकालो विय कायविञ्ञाणस्स द्वारसङ्कन्तिअकरणं वेदितब्बं।

४१४. **अस्मा**ति इमस्स बीजस्स। **हेतुपवत्तितो**ति पच्चयप्पवत्तितो।

४१५. इदानि तिहेतुकोमककम्मेन गहितदुहेतुकपटिसन्धिकस्स विपाकप्पवत्ति दुहेतुकुक्कट्ठेन गहितदुहेतुकपटिसन्धिकस्स विपाकप्पवत्तिया समानाति तं ठपेत्वा दुहेतुककम्मेन गहितदुहेतुकपटिसन्धिकस्सेव विपाकप्पवत्तिं दस्सेतुं "**दुहेतुकेन कम्मेना**"तिआदि वुत्तं।

४१८-९. दुहेतुकपटिसन्धिकस्स कामावचरतिहेतुकजवनानं सम्भवेपि कम्मसरिक्खकानेव जवनानि दस्सेतुं "**सोमनस्स...पे०... दुहेतुके**"ति वुत्तं। तिहेतुकजवनावसानेपि पनस्स पटिसन्धिदायककम्मं तिहेतुकविपाकदाने असमत्थन्ति तिहेतुकतदारम्मणाभावतो, जवनस्स च कम्मसरिक्खकहेतुवसेन दुहेतुकभावतो दुहेतुकतदारम्मणमेव होति।

४२४. **इमानि च भवङ्गानी**ति इमानि चत्तारि मूलागन्तुकपिट्ठिभवङ्गानि। **अट्ठ ही**ति अट्ठेव।

४२६. **सोतघानादिना**ति सोतघानादिविञ्ञाणेहि। एत्थापि अम्बोपमा पाकटिकाव। यन्तवाहोपमाय पनेत्थ सत्त यन्तवाहा तेहि हत्थयन्ते नाम सज्जिते सालसामिकं अट्ठमं कत्वा वुत्तनयानुसारेनेव योजना वेदितब्बा।

४३४-६. **वुड्ढिमुपेतस्सा**ति मातुकुच्छितो निक्खमित्वा संवरासंवरे पट्ठपेतुं समत्थभावेन वुड्ढिप्पत्तस्स। किञ्चापि अहेतुकपटिसन्धिकस्स कम्मसरिक्खकजवनमेव दस्सेतुं "**दुहेतूनं...पे०... वसानस्मि**"न्ति वुत्तं। तिहेतुकजवनम्पि पन तेसं जवति, जवनस्स दुहेतुकभावेपि कम्मस्स दुहेतुकविपाकदाने असमत्थताय "**अहेतुक...पे०... जायते**"ति वुत्तं।

४४३-८. "**अहेतुपटिसन्धिस्सा**"तिआदीसु अधिप्पायो हेट्ठा आगतोव। अपायेसु पटिसन्धिदायककम्मेन पटिसन्धितो हीनतदारम्मणस्स अनिप्फन्नतो तस्स लब्भमानट्ठानमेव दस्सेतुं "**सुगतिय**"न्ति वुत्तं, कामावचरसुगतियन्ति अत्थो। **तेना**ति तेन जातपटिसन्धिविपाकेन। "चतूसु अपायेसु लब्भती"ति वत्वा तस्स विसयदस्सनत्थं "**थेरो नेरयिकान**"न्तिआदि वुत्तं। **थेरो**ति निरयचारिकाय पाकटत्ता महामोग्गल्लानत्थेरमाह। निरये भवा **नेरयिका। धम्मं देसेती**ति निरये पदुमं मापेत्वा पदुमकण्णिकाय निसिन्नो धम्मं देसेति। **वस्सती**ति अन्तोहेत्वत्थं कत्वा वुत्तं, वस्सापेतीति अत्थो। **थेरं दिस्वा**ति थेरस्स दस्सनहेतु। इमिना इन्दनीलपटिमावण्णस्स थेरस्स इट्ठारम्मणभावेन कुसलविपाकचक्खुविञ्ञाणुप्पत्तिया कारणं दस्सेति। एस नयो "**धम्मं सुत्वा**"तिआदीसुपि। **गन्ध**न्ति तेन मापितगन्धं। **अट्ठकथायं** पन "चन्दनवने दिवाविहारं निसिन्नस्स चीवरगन्ध"न्ति (ध० स० अट्ठ० ४९८ विपाकुद्धारकथा) वुत्तं। **घायत**न्ति घायन्तानं। **सन्तीरणद्वय**न्ति अतिइट्ठमज्झत्तस्स गन्धादिनो वसेन सन्तीरणद्वयं। कुसलविपाकानं, इट्ठारम्मणस्स च निरये सम्भवदीपनेन सेसापायत्तयेपि सम्भवो दस्सितोव होति।

४५०. नियमोयेव **नियमत्तं,** तदारम्मणचित्तम्पि जवनेन नियामितन्ति वुत्तनियमोति अत्थो। **कुसलं पन सन्धाया**ति कुसलजवनं सन्धाय दीपितं अट्ठकथायं, कुसलस्स विय अकुसलस्स सदिसविपाकाभावतोति अधिप्पायो। एत्थ च कुसलजवनानन्तरं सहेतुकतदारम्मणस्सेव वचनं। जवनस्स कम्मसरिक्खकहेतुवसेन सहेतुकत्ता जवनानुरूपतो वुत्तं। परिचितवसेन पन अञ्ञकम्मेनापि तं अहेतुकतदारम्मणं न होतीति न वत्तब्बं। न हि पटिसन्धिजनकमेव कम्मं तदारम्मणं

जनेति, अथ खो अञ्ञकम्मम्पि पटिसन्धिदायककम्मेन निब्बत्तेतब्बतदारम्मणतो विसदिसम्पि निब्बत्तेतीति। अकुसलजवनानन्तरञ्च अहेतुकतदारम्मणम्पि जवनस्स कम्मसरिक्खकहेतुकत्ता तदनुरूपतो वुत्तं। यथावुत्तनयेन पन सहेतुकतदारम्मणम्पि न होतीति नत्थि।

४५६-७. एत्तावता **तिपिटकचूळनाग**त्थेरवादे सोळस विपाकचित्तानि सद्धिं द्वादसकमग्गेन चेव अहेतुकट्ठकेन च विभावेत्वा **मोरवापिवासिमहादत्त**त्थेरवादे विसेसाभावतो तं अनामसित्वा **महाधम्मरक्खित**त्थेरवादे कुसलाकुसलकिरियवसेन पिण्डित्वा दस्सितानं पिण्डजवनानं वसेन तदारम्मणं दस्सेतुं **''सोमनस्सयुते चित्ते''**तिआदि वुत्तं। **सोमनस्स...पे०... जविते**ति इट्ठारम्मणे कुसलाकुसलकिरियाब्याकतवसेन सोमनस्सयुतेसु तेरससु जवनचित्तेसु जवितेसु। **गवेसितब्बा...पे०... मानसा**ति हेट्ठा वुत्तनयेन सोमनस्ससहगतानि पञ्चेव तदारम्मणचित्तानि गवेसितब्बानि। **उपेक्खा...पे०... जवितेसू**ति कुसलाकुसलकिरियवसेन चुद्दससु उपेक्खासहगतजवनचित्तेसु जवितेसु। **छ गवेसितब्बानी**ति उपेक्खासहगतानि छ एव गवेसितब्बानि। खीणासवानं पहीनविपल्लासताय किरियाजवनं इट्ठारम्मणे उपेक्खासहगतं न होतीति सोमनस्ससहगतकिरियाजवनेसु जवितेसु सोमनस्ससहगततदारम्मणमेव होति। इट्ठमज्झत्ते, अनिट्ठादीसु च सोमनस्सभावतो उपेक्खासहगतकिरियाजवनेसु जवितेसु उपेक्खासहगततदारम्मणमेवाति इदमेत्थ सन्निट्ठानं। सेखपुथुज्जनानं पन अप्पहीनविपल्लासताय इट्ठमज्झत्ते, अनिट्ठअनिट्ठमज्झत्तारम्मणे च सोमनस्ससहगतजवनं उप्पज्जतीति सोमनस्ससहगतजवनावसाने सोमनस्ससहगततदारम्मणमेव होति, नत्थि उपेक्खासहगतन्ति नायं नियमो। इट्ठारम्मणेपि वुत्तनयानुसारेन योजेतब्बं। तेनेतं वुच्चति –

''परित्तकुसलादोस-पापसातक्रियाजवा।
पञ्चस्वेकं तदालम्बं, सुखितेसु यथारहं॥

''पापा कामसुभा चेव, सोपेक्खा च क्रियाजवा।
सोपेक्खेसु तदालम्बं, छस्वेकमनुरूपतो''ति॥

४५८-६२. दुहेतुकाहेतुकानं विपाकावरणेहि समन्नागतत्ता झानुप्पादोयेव नत्थीति आह **''तिहेतुसोमनस्सेना''**ति। **झानतो परिहीनस्सा**ति उप्पादितलोकियज्झानतो परिहीनस्स। **विप्पटिसारिनो**ति ''महन्तेन वायामेन उप्पादितो मे पणीतधम्मो नट्ठो''ति उप्पन्नविप्पटिसारवन्तस्स। **किं...पे०... मानस**न्ति अयं अनुमतिपुच्छा, तदारम्मणमानसं जायते किं, न वाति अयञ्हेत्थ अत्थो। भवङ्गपातो वा होतु तदारम्मणं वा, को एत्थ विबन्धोति आह **''पट्ठाने पटिसिद्धा''**तिआदि। अवचनमेव पटिसेधोति कत्वा आह **''पटिसिद्धा''**ति। यदि सोमनस्सानन्तरं दोमनस्सं, दोमनस्सानन्तरं सोमनस्सं वा उप्पज्जेय्य, तदा ''सुखाय वेदनाय सम्पयुत्तो धम्मो अदुक्खमसुखाय वेदनाय सम्पयुत्तस्स धम्मस्स अनन्तरपच्चयेन पच्चयो''तिआदि (पट्ठा० १.२.४५) विय ''सुखाय वेदनाय सम्पयुत्तो धम्मो दुक्खाय वेदनाय सम्पयुत्तस्स धम्मस्स अनन्तरपच्चयेन पच्चयो, दुक्खाय वेदनाय...पे०... सुखाय वेदनाय...पे०... पच्चयो''ति वत्तब्बं सिया, तथा गणनवारे एकेकवेदनासम्पयुत्तस्स अत्तना समानवेदनासम्पयुत्तस्स, इतरवेदनाद्वयसमङ्गिस्स च पच्चयभावं सन्धाय ''अनन्तरे नवा''ति वत्तब्बं सिया, न च पनेवं पाळि आगता। दोमनस्ससोमनस्सवेदनाय सम्पयुत्तानं पन अञ्ञमञ्ञअनन्तरपच्चयवसेन गणनद्वयं परिहापेत्वा ''अनन्तरे सत्ता''ति वुत्तं, तस्मा यथाधम्मसासने अवचनम्पि पटिसेधसदिसं अभावस्सेव दीपनतोति वुत्तं ''पटिसिद्धा''ति। अस्स वा अनन्तरं दोमनस्सस्स उप्पत्तीति सम्बन्धो। **अस्सा**ति सोमनस्सस्स।

एवं भवङ्गपाताभावे कारणं वत्वा पुन तदारम्मणाभावं दस्सेन्तो आह **''महग्गत''**न्तिआदि। **तत्थेव पटिसिद्ध**न्ति ''परित्तारम्मणो धम्मो महग्गतारम्मणस्स धम्मस्स कम्मपच्चयेन पच्चयो''ति वचनाभावतो तत्थेव पट्ठाने पटिसिद्धं। **किं नु कातब्ब**न्ति किं कातब्बं। न हि सक्का एत्तकेन ''अचित्तको''ति वत्तुन्ति अधिप्पायो। एत्थ च महग्गतारम्मणमेव दोमनस्सजवनं निदस्सनवसेन वुत्तं। इट्ठारम्मणभूते पन बुद्धादिआरम्मणेपि दोमनस्सजवने जविते सोमनस्सपटिसन्धिकस्स तदारम्मणसम्भवो, भवङ्गपातो वा नत्थि।

४६४-५. इट्ठारम्मणे उपेक्खासहगततदारम्मणस्स दोमनस्सानन्तरञ्च सोमनस्सस्स अभावतो ''उपेक्खासहिता हेतू''तिआदिना आचरियेन वुत्ते पुन चोदको अनुबन्धन्तो आह **''आवज्जनं किमस्सा''**ति। आचरियो पन किमेत्थ आवज्जनगवेसनेन, तेन विनाव इदं चित्तं उप्पज्जतीति दीपेन्तो आह **''नत्थि त''**न्ति। पुन चोदको आवज्जनेन विना चित्तप्पवत्तिं अविसहन्तो आह **''तं जायते कथ''**न्ति। एवं पन वुत्ते आचरियो किमेत्थ आवज्जनेन, किञ्च आवज्जनेन विना चित्तप्पवत्ति नत्थीति इदं न एकन्तिकन्ति दीपेतुं निरावज्जनचित्तानं सम्भवं दस्सेन्तो आह **''भवङ्गावज्जनान''**न्तिआदि, भवङ्गावज्जनानं किं आवज्जनं, ननु नत्थेवाति अधिप्पायो। ननु च भवङ्गावज्जनानि ताव सकसकविसयेसु निन्नत्ता आवज्जनेन विना उप्पत्तियं बहुलं चिण्णत्ताव उप्पज्जन्ति, अयं पन कथं उप्पज्जतीति इदं अनुयोगं सन्धाय पुन निरावज्जनचित्तानि दस्सेन्तो आह **''मग्गस्सा''**तिआदि। **मग्गस्स** लोकुत्तरमग्गस्स चित्तस्स। **अनन्तरस्स फलस्स चा**ति मग्गानन्तरस्स फलस्स च अत्थाय किं आवज्जनन्ति सम्बन्धो। **एवं नत्थी**ति यथा एतेसं, एवमेतस्सापि नत्थि।

आनन्दाचरियो पनेत्थ अरियमग्गचित्तं, मग्गानन्तरानि फलानि च परिकम्मावज्जनेन सावज्जनानि समानानि असतिपि निरावज्जनुप्पत्तियं निन्नादिभावे उप्पत्तिया निदस्सनमत्तवसेन वुत्तानीति वण्णेति। अयं हिस्स अधिप्पायो – यदि हि निब्बानारम्मणावज्जनाभावं सन्धाय वुत्तानि सियुं, गोत्रभुवोदानानि दस्सितब्बानि सियुं तेहेव एतेसं निरावज्जनतासिद्धितो, फलसमापत्तिकाले च ''परित्तारम्मणं महग्गतारम्मणं अनुलोमं फलसमापत्तिया अनन्तरपच्चयेन पच्चयो''ति वचनतो समानारम्मणावज्जनरहितत्ता मग्गानन्तरानि फलचित्तानीति एवं समापत्तिफलचित्तानि न वज्जेतब्बानि सियुं, गोत्रभुवोदानानि पन यदिपि निब्बाने चिण्णानि, समुदाचितानि च न होन्ति, आरम्मणन्तरे चिण्णसमुदाचितानेव। फलसमापत्तिचित्तानि च मग्गवीथितो उद्धं तदत्थं परिकम्मसब्भावाति तेसं गहणं न कतं। अनुलोमानन्तरञ्च फलसमापत्तिचित्तं चिण्णसमुदाचितं, न नेवसञ्ञानासञ्ञानन्तरं मग्गानन्तरस्स विय तदत्थं परिकम्माभावाति ''निरोधा वुट्ठहन्तस्सा''ति तञ्च निदस्सितन्ति।

४६७. ''किमस्सारम्मण''न्ति वत्वा निरावज्जनभावं विय अनारम्मणभावम्पि वदेय्याति तब्भावदस्सनेन अत्तनो वचनं साधेन्तो आह **''विना आरम्मणेना''**तिआदि। **यं किञ्ची**ति यं किञ्चि परिचितपुब्बं आरम्मणं आरब्भ। ननु च तदारम्मणिकं सियाति वुत्तं, तदारम्मणञ्च जवनारम्मणमेव गण्हाति इतरथा तदारम्मणभावायोगतोति कथमस्सा परित्तारम्मणन्ति? सच्चं, कामावचरविपाकचित्तानं एकन्तपरित्तारम्मणत्ता नास्सा महग्गतारम्मणभावो युत्तो, ''तदारम्मण''न्ति च तदारम्मणट्ठाने उप्पत्तिं गहेत्वा वुत्तं, न तस्सा तदारम्मणकिच्चसम्भवतो। केन चरहि किच्चेनायं उप्पज्जतीति? तदारम्मणकिच्चं ताव यथावुत्तकारणतोव नत्थि, नापि सन्तीरणकिच्चं तथा अप्पवत्तनतो। पटिसन्धिचुतीसु वत्तब्बमेव नत्थि। पारिसेसतो पन भवस्स अङ्गभावतो भवङ्गकिच्चन्ति युत्तं सिया, पटिसन्धिभूतमेव चित्तं भवङ्गन्ति इदं येभुय्यवसेन वुच्चतीति। **आचरियधम्मपाल**त्थेरेनापि हि अयमत्थो दस्सितोव।

४६८-७३. अविज्जमाने कारके कथं कस्सचि निरावज्जनप्पवत्तिकस्स सावज्जनभावेनाति चोदनं सन्धाय चित्तनियामनिब्बत्तमेतन्ति दस्सेतुं "**उतुबीजनियामो चा**"तिआदि वुत्तं। **उतुबीजनियामो चा**ति उतुनियामो चेव बीजनियामो च, उतुसभावनियामो बीजसभावनियामोति वुत्तं होति। कम्मधम्मानं नियामो एव **कम्मधम्मनियामता**। **एकप्पहारेना**ति तं तं उतुसमयमनतिक्कमित्वा एकस्मिंयेव काले। **फलपुप्फादी**ति **आदि**-सद्देन पल्लवादीनं सङ्गहो। **सब्बेस**न्ति तस्मिं समये फलादिनिब्बत्तनकानं सब्बेसं। **तंतंतुल्यफलुब्भवो**ति तेहि तेहि बीजेहि सदिसानं फलानं निब्बत्ति, तेसं तेसं बीजानं अनुरूपफलनिब्बत्तीति अत्थो। "कुलत्थगच्छस्स उत्तरग्गभावो, दक्खिणवल्लिया दक्खिणरुक्खपरिहरणं, सूरियावत्तपुप्फानं सूरियाभिमुखभावो, मालुवलताय रुक्खाभिमुखगमन"न्ति एवमादीनिपि एत्थेव समोधानं गच्छन्ति। **छिद्दत्त**न्ति छिद्दवन्तभावो, छिद्दंयेव वा। **बीजजो**ति बीजसम्भवो नियामो। **यतो देती**ति यतो यतो पच्चयभावनियामतो देति। **अय**न्ति अयं अत्तनो अनुरूपस्स, सदिसस्स, विसदिसस्स च फलस्स निब्बत्तने नियामो। अपिच –

> "न अन्तलिक्खे न समुद्दमज्झे,
> न पब्बतानं विवरं पविस्स।
> न विज्जती सो जगतिप्पदेसो,
> यत्थट्ठितो मुच्चेय्य पापकम्मा"ति॥ (ध॰ प॰ १२७) –

इमिस्सा गाथाय अट्ठुप्पत्तियं आगतं तिणकलापस्स गहितअग्गिनो उड्डहित्वा आकासे गच्छतो काकस्स गीवाय पटिमुच्चनं, नाविकस्स भरियाय वालुकघटं कण्ठे बन्धित्वा समुद्दुदके पक्खिपनं, पब्बतकूटस्स पतित्वा लेणे वसन्तानं भिक्खूनं द्वारपिदहनन्ति तंतंकम्मसरिक्खकविपाकनिब्बत्तनम्पि कम्मनियामोयेवाति वेदितब्बं। **जातिय**न्ति पटिसन्धिग्गहणे चेव मातुकुच्छितो निक्खमने च, निदस्सनमत्तञ्चेतं अभिसम्बोधिधम्मचक्कप्पवत्तनादीसुपि मेदनीकम्पनादिकस्स सम्भवतो। **बोधिसत्तस्सा**ति पच्छिमभविकबोधिसत्तस्स। **मेदनीकम्पनादिक**न्ति पथवीकम्पनादिकं द्वत्तिंसपुब्बनिमित्तं। **विसेसत्तमनेकम्पी**ति पुब्बनिमित्ततो अञ्ञं तदा पातुभूतं सब्बं अच्छरियं। **उप्पत्तावज्जनादीन**न्ति "त्वं आवज्जनं होहि, त्वं दस्सन"न्तिआदिना नियुञ्जकस्स अभावेपि तंतंकिच्चवसेन तेसं तेसं उप्पत्ति।

४७४. हदये अन्धकारो वियाति हदयन्धकारो, सम्मोहोति अत्थो, तस्स विद्धंसनं पहानकरणन्ति **हदयन्धकारविद्धंसनं। पयुत्तो**ति अनुपादापरिनिब्बानं अप्पत्वा अनोसक्कमानेन वीरियेन वीरियवा। **मोहन्धकारापगम**न्ति अरहत्तमाह।

इति अभिधम्मत्थविकासिनिया नाम

अभिधम्मावतारसंवण्णनाय

विपाकचित्तप्पवत्तिनिद्देसवण्णना निट्ठिता।

८. अट्ठमो परिच्छेदो

पकिण्णकनिद्देसवण्णना

४७५-६. इदानि यथावुत्तानं सब्बेसम्पि चित्तानं पाकटभावत्थं –

''सुत्तं दोवारिको चेव,
गामिल्लो अम्बगोळियो।
जच्चन्धो पीठसप्पी च,
उपनिस्सयमत्थसो''ति॥ (ध॰ स॰ अट्ठ॰ ४९८ विपाकुद्धारकथा) –

अट्ठकथाय आगतमातिकाय वसेन पकिण्णकनयं दस्सेतुं **''इदानि पना''**तिआदि आरद्धं। तत्थ **मनस**न्ति चित्तानं। ''मानस''न्तिपि पठन्ति, तं न सुन्दरं। **पन्थमक्कटको**ति पाणकपटङ्गादीनं सञ्चरणट्ठाने जालं पसारेत्वा तेसं मग्गरक्खणतो ''पन्थमक्कटको''ति लद्धनामो उण्णनाभि। **दिसासु पन पञ्चसू**ति उपमेतब्बानं पञ्चपसादानं वसेन वुत्तं। **तत्था**ति मग्गे, तत्थ जालमज्झेति वा सम्बन्धो। **सुत्तं पसारेत्वा**ति जालबन्धनमाह।

४७८-८०. न्ति रुधिरमाह। दिसासु दुतियादीसु सुत्ते...पे॰... घट्टितेति सम्बन्धो। **''पसादा पञ्च दट्ठब्बा''**तिआदि उपमासंसन्दनं। **चित्तं...पे॰... विया**ति हदयवत्थुं निस्साय पवत्तमानचित्तं जालमज्झे निपन्नमक्कटको विय दट्ठब्बं।

४८२-५. पसादघट्टनन्ति पसादे घट्टितं। **भवङ्गावट्टन**न्ति भवङ्गं आवट्टेन्तं। धम्मतो अञ्ञा काचि किरिया नाम नत्थीति धम्ममेव चलनेन सह उपमेति। **सुत्तानुसारंवा**ति सुत्तानुसारेन गमनं विय। जवनस्स आरम्मणरसानुभवनतो तस्स पवत्ति यूसपानेन सद्धिं उपमेत्वा वुत्ता। **वत्थुंयेवा**ति यथा पुरिमचित्तानि हदयवत्थुनिस्सितानि पसादवत्थुं अनुगतानि अञ्ञारम्मणानि च होन्ति, न एवं भवङ्गं। तं पन वत्थारम्मणन्तररहितं केवलं हदयवत्थुमेव निस्साय पवत्ततीति दीपेति। **परिवत्तन**न्ति पुन भवङ्गभावेन परिवत्तनं। भवङ्गावज्जनादीनं धम्मतो भेदेपि सन्ततिवसेन एकत्तं गहेत्वा एकेनेव मक्कटकेन उपमासंसन्दनं वुत्तं।

४८६-९०. उपमा एव **ओपम्मं**। ततो पसादवत्थुतो चित्ताति सम्बन्धो। **दीपितं** इमिना ओपम्मेन। **एकेकारम्मण**न्ति रूपादीसु पञ्चसु एकेकं आरम्मणं। **सब्बसो**ति सब्बेसु चक्खादीसु यत्थ कत्थचीति अत्थो। इदानि एकेकारम्मणस्स द्वीसु द्वीसु आपाथगमनं पकासेतुं **''रूपं चक्खुपसादम्ही''**तिआदि वुत्तं। खे आकासे गच्छतीति **खगो,** पक्खि। **साखिनो**ति रुक्खस्स।

४९२-३. रूपस्साति सम्बन्धे सामिवचनं, तस्स पन घट्टनं, आपाथगमनम्पि चाति द्वीहि सह सम्बन्धो। **पसादस्सा**ति कम्मत्थे सामिवचनं, अत्थतो आपाथगमनम्पि चाति सम्बन्धो। आरम्मणवसेन, आपाथं आगच्छन्तस्सपि पसादघट्टनेन च भवङ्गचलनस्स पच्चयभावेन आपाथं विय उपगमनन्ति अत्थो।

४९४-५. ततोति भवङ्गचलनतो परं, **कुसलं जवनं चित्त**न्ति कामावचरकुसलजवनचित्तं। **अकुसलमेव वा**ति **वा**-सद्देन किरियाब्याकतचित्तम्पि सङ्गण्हाति। एत्थ सिया – को पनेतं जवनं कुसलताय वा अकुसलताय वा नियमेतीति? योनिसोमनसिकारो चेव अयोनिसोमनसिकारो च। यस्स हि चतुचक्कसम्पदावसेन योनिसोमनसिकारो पवत्तति, आवज्जनं, वोट्ठब्बनञ्च योनिसोव आवट्टेति, ववत्थापेति च, तस्स अकुसलुप्पत्ति नत्थि। यस्स पन वुत्तविपरियायेन अयोनिसोमनसिकारो च होति, आवज्जनं, वोट्ठब्बनञ्च अयोनिसो च आवट्टेति, ववत्थापेति च, तस्स कुसलजवनुप्पत्ति नत्थि, तस्मा योनिसोमनसिकारो कुसलताय, अयोनिसोमनसिकारो अकुसलताय च नियमेतीति दट्ठब्बं। किरियाजवनं पन

अरहत्तमेव नियमेति। केचि पन ''किरियाजवनं पन मनसिकारो च नियमेति। यथा हि आवज्जनं कुसलाकुसलानं विसुं विसुं पच्चयो होति, एवं किरियाजवनस्सापी''ति वदन्ति।

४९७. **दोवारिकोपमादीनी**ति एत्थ एको राजा सयनगतो निद्दायति, तस्स परिचारको पादे परिमज्जन्तो निसीदि, बधिरदोवारिको द्वारे ठितो, तयो पटिहारा सयनस्स, द्वारस्स च मज्झे पटिपाटिया ठिता। अथेको पच्चन्तवासी मनुस्सो पण्णाकारं आदाय द्वारं आकोटेसि, बधिरदोवारिको सद्दं न सुणाति, पादपरिमज्जको सञ्ञं अकासि, ताय सञ्ञाय द्वारं विवरित्वा पस्सि, पठमपटिहारो पण्णाकारं गहेत्वा दुतियस्स अदासि, दुतियो ततियस्स, ततियो रञ्ञो, राजा परिभुञ्जि। तत्थ राजा विय जवनं दट्ठब्बं, पादपरिमज्जको विय आवज्जनं, बधिरदोवारिको विय चक्खुविञ्ञाणं, तयो पटिहारा विय सम्पटिच्छनादीनि तीणि वीथिचित्तानि, पच्चन्तवासिनो पण्णाकारं आदाय द्वाराकोटनं विय आरम्मणस्स पसादघट्टनं, पादपरिमज्जकेन सञ्ञाय दिन्नकालो विय किरियामनोधातुया भवङ्गस्स आवट्टितकालो, तेन दिन्नसञ्ञाय बधिरदोवारिकस्स द्वारविवरकालो विय चक्खुविञ्ञाणस्स आरम्मणे दस्सनकिच्चसाधनकालो, पठमपटिहारेन पण्णाकारस्स गहितकालो विय विपाकमनोधातुया आरम्मणस्स सम्पटिच्छितकालो, पठमेन दुतियस्स दिन्नकालो विय विपाकमनोविञ्ञाणधातुया आरम्मणस्स सन्तीरितकालो, दुतियेन ततियस्स दिन्नकालो विय किरियामनोविञ्ञाणधातुया आरम्मणस्स ववत्थापितकालो, ततियेन रञ्ञो दिन्नकालो विय वोट्ठब्बनेन जवनस्स निय्यातितकालो, रञ्ञो परिभोगकालो विय जवनस्स आरम्मणरसानुभवनकालोति अयं दोवारिकोपमा।

''इदं पन ओपम्मं किं दीपेती''तिआदि उच्छुयन्तूपमाय वुत्तनयेन वेदितब्बा। सम्बहुला गामदारका अन्तरवीथियं पंसुं कीळन्ति, तत्थेकस्स हत्थे कहापणो पटिहञ्ञि। सो ''मय्हं हत्थे पटिहतं, किं नु खो एत''न्ति आह। अथेको ''पण्डरं एत''न्ति आह। अपरो सह पंसुना गाळ्हं गण्हि। अञ्ञो ''पुथुलं चतुरस्सं एत''न्ति आह। अपरो ''कहापणो एसो''ति आह। अथ आहरित्वा मातु अदंसु, सा कम्मे उपनेसि। तत्थ सम्बहुलानं दारकानं अन्तरवीथियं कीळन्तानं सन्निसिन्नकालो विय चित्तप्पवत्ति दट्ठब्बा, कहापणस्स हत्थे पटिहतकालो विय आरम्मणेन पसादस्स घट्टितकालो, ''किं नु खो एत''न्ति वुत्तकालो विय तं आरम्मणं गहेत्वा किरियामनोधातुया भवङ्गस्स आवट्टितकालो, ''पण्डरं एत''न्ति वुत्तकालो विय चक्खुविञ्ञाणेन दस्सनकिच्चस्स साधितकालो, सह पंसुना गाळ्हं गहितकालो विय विपाकमनोधातुया आरम्मणस्स सम्पटिच्छितकालो, ''पुथुलं चतुरस्सं एत''न्ति वुत्तकालो विय विपाकमनोविञ्ञाणधातुया आरम्मणस्स सन्तीरितकालो, ''कहापणो एसो''ति वुत्तकालो विय किरियामनोविञ्ञाणधातुया आरम्मणस्स ववत्थापितकालो, मातरा कम्मे उपनीतकालो विय जवनस्स आरम्मणरसानुभवनं वेदितब्बन्ति अयं गामदारकोपमा।

इदं ओपम्मं किं दीपेति? किरियामनोधातु अदिस्वाव भवङ्गं आवट्टेति, विपाकमनोधातु अदिस्वाव सम्पटिच्छति, विपाकमनोविञ्ञाणधातु अदिस्वाव सन्तीरेति, किरियामनोविञ्ञाणधातु अदिस्वाव ववत्थापेति, जवनं अदिस्वाव आरम्मणरसं अनुभवति, एकन्तेन पन चक्खुविञ्ञाणमेव दस्सनकिच्चं साधेतीति दीपेति। जच्चन्धपीठसप्पीउपमा उपरि आगमिस्सति।

४९८-५०९. एत्तका उपमा सङ्गहेत्वा ''दोवारिकोपमादीनी''ति वत्वा ''उपनिस्सयमत्थसो''ति एत्थ उपनिस्सयभावं पकासेतुं **''असम्भेदेना''**तिआदिमाह। **असम्भेदेना**ति अविनट्ठभावेन, वातपित्तादीहि अनुपहतभावेन च। वातपित्तादिउपहतम्पि हि चक्खुविञ्ञाणस्स पच्चयभावानुपगमनतो सम्भिन्नमेव नाम होति, पञ्चिन्द्रियानं अत्थिक्खणेयेव निस्सयभावूपगमनतो खणवसेन असम्भेदोपि युज्जति। एस नयो सोतपसादादीसुपि। **रूपापाथगमेना**ति दूरे ठितस्स

फलिकादीहि अन्तरितस्स चक्खुविञ्ञाणुप्पत्तिया पच्चयो भवितुं योग्यदेसे अवट्ठितवसेन रूपस्स आपाथगमनेन। एवञ्च कत्वा दूरे ठितं, परम्मुखे ठितम्पि दिब्बचक्खुस्स आपाथगतमेव नाम होति। **आलोकनिस्सयेनापी**ति रूपावभासनसमत्थआलोकसङ्खातनिस्सयेन। आलोके सति सम्भवो चेत्थ आलोकनिस्सयता, न आलोकस्स निस्सयपच्चयत्ता। मनक्कारोव हेतु मनक्कारहेतु, तेन सह वत्ततीति **समनक्कारहेतु**। तेन आलोकनिस्सितं दस्सेति। **समेतेही**ति संयुत्तेहि एकीभूतेहि, न एकस्सपि विरहेनाति अत्थो।

आकासनिस्सयेनाति कण्णच्छिद्दसङ्खातआकासनिस्सयेन। तेनेव हि **अट्ठकथायं** ''न हि पिहितकण्णच्छिद्दस्स सोतविञ्ञाणं पवत्तती''ति वुत्तं। बाहिराकासम्पि पन इच्छितमेव। तथा हि अविवरे गेहे निसीदित्वा वुच्चमानानं बहि ठिता न सुणन्ति। **वायोसन्निस्सयेना**ति नासिकच्छिद्दं पविसनवायुसन्निस्सयेन। **आपोसन्निस्सयेना**ति खेळसङ्खातआपोसन्निस्सयेन। **पथवीसन्निस्सयेना**ति कायपसादवत्थुस्स पथवीधातुसन्निस्सयेन। **मनोविञ्ञाण**न्ति जवनमनोविञ्ञाणं।

५१०-११. मनो...पे०... वेदितब्बन्ति ''असम्भेदा मनस्सा''ति एत्थ वुत्तं मनो भवङ्गचित्तन्ति वेदितब्बं। तं पन चुतिवसेन निरुद्धम्पि किरियामयचित्तस्स पच्चयभावं अनुपगन्त्वा केवलं भवङ्गप्पवत्तिवसेन मन्दथामगतं हुत्वा पवत्तनम्पि सम्भिन्नमेवाति दट्ठब्बं। **नायं सब्बत्थ गच्छती**ति चतुवोकारे अलब्भनतो। तेनाह **''भवं तु पञ्चवोकार''**न्तिआदि। तत्थ पञ्चन्नं खन्धानं वोकारो एत्थाति **पञ्चवोकारो**। होति हि भिन्नाधिकरणम्पि अञ्ञपदत्थसमासो यथा ''उरसिलोमो''ति। अथ वा यथापच्चयं पञ्चहि खन्धेहि वोकरीयतीति **पञ्चवोकारो**। ''अत्थतो''ति एवमादिकं पदं चक्खादीनि दस्सनादिकिच्चानीति एत्तकमेव सन्धाय वुत्तं, न अञ्ञं किञ्चि विसेसनन्ति न तत्थ विनिच्छयो वुत्तो।

५१२-४. सब्बानीति कामावचरादिभेदं अनामसित्वा सब्बानि। **कम्म**न्ति पटिसन्धिनिब्बत्तका उपपज्जवेदनीयभूता, अपरापरियवेदनीयभूता वा चेतना। **कम्मनिमित्त**न्ति यं वत्थुं आरम्मणं कत्वा आयूहनकाले कम्मं आयूहति, तं दानूपकरणादिकं, पाणघातोपकरणादिकञ्च। **गतिनिमित्त**न्ति भवन्तरमुपपज्जितब्बभवपरियापन्नवण्णायतनं, तं पन सुगतियं मनुस्सलोके निब्बत्तन्तस्स रत्तकम्बलसदिसमातुकुच्छिवण्णवसेन, देवलोके निब्बत्तन्तस्स उय्यानकप्परुक्खवण्णवसेन, दुग्गतियं निब्बत्तन्तस्स अग्गिजालादिवण्णवसेन, पेततिरच्छानयोनीसु पेततिरच्छानानं निबद्धसञ्चरणट्ठानपरियापन्नतावण्णवसेन च दट्ठब्बं। **''तिविध''**न्ति इदं यथासम्भववसेन वुत्तं, रूपारूपसम्बन्धीनं पन कम्मनिमित्तमेव आरम्मणं होति। तथा हि महग्गतविपाकानि एकन्तेन कम्मसदिसारम्मणानि वुत्तानि।

पच्चुप्पन्नमतीतं वाति खणवसेन पच्चुप्पन्नमतीतं वा। तत्थ गतिनिमित्तं एकन्तेन पच्चुप्पन्नमेव, कम्मनिमित्तं पच्चुप्पन्नमतीतं वा, कम्मं पन अतीतमेव। अनागतारम्मणं पन पच्चुप्पन्नकम्मनिमित्तगतिनिमित्तं विय अनापाथगतत्ता, अतीतकम्मकम्मनिमित्तं विय अननुभूतत्ता च विभूतं हुत्वा नोपतिट्ठातीति अतिसन्तभावेन पवत्तमाना पटिसन्धि तं आरब्भ पवत्तितुं न सक्कोतीति वुत्तं **''नत्थि अनागत''**न्ति। महग्गतपटिसन्धीनं एकन्तेन कम्मसदिसारम्मणभावेन कम्मस्स विय अतीतनवत्तब्बारम्मणत्ता न तासं विसुं आरम्मणं उद्धटं। तत्थ दुतियचतुत्थारूपपटिसन्धीनं अतीतमेव आरम्मणं इतरासं नवत्तब्बन्ति दट्ठब्बं।

५१७-२०. महाविपाकानं पटिसन्धादिचतुकिच्चवसेनेव पवत्तनतो रूपारूपभवे पटिसन्धिभवङ्गचुतिवसेन तंतंविपाकस्सेव पवत्तितो, तदारम्मणस्स च अभावेन तत्थ न लब्भतीति आह **''महापाका...पे०... द्वये''**ति। अनिट्ठरूपानं ब्रह्मलोके असम्भवेपि तत्थ ठत्वा इध अनिट्ठारम्मणं पस्सन्तानं अकुसलविपाकानि न उप्पज्जन्तीति न वत्तब्बन्ति

रूपभवेपि सन्तीरणत्तयं वुत्तं। अभिधम्मत्थसङ्गहसच्चसङ्खेपादीसुपि हि इमिनाव अधिप्पायेन रूपलोके अकुसलविपाकप्पवत्ति दस्सिता। अपरे पन ''कामभवे सन्तीरणत्तयं, रूपभवे सन्तीरणद्वयन्ति यथालाभवसेन योजेतब्ब''न्ति वदन्ति।

कदाचिपीति परित्तारम्मणेसु परित्तजवनानं उप्पादेपि। ''बीजस्साभावतो''ति रूपारूपभवद्वये तदारम्मणाभावस्स कारणं वत्वा तमेव पकासेतुं **''पटिसन्धिबीज''**न्तिआदि वुत्तं। पटिसन्धियेव बीजभूतन्ति **पटिसन्धिबीजं। तस्सा**ति तदारम्मणस्स।

५२१. यदि एवं चक्खुविञ्ञाणादीनम्पि कामावचरपटिसन्धिबीजत्ता तत्थ अभावो आपज्जतीति चोदेन्तो आह **''चक्खुविञ्ञाणादीन''**न्तिआदि। **इन्द्रियान**न्ति चक्खुविञ्ञाणादीनं वत्थुद्वारभूतानं चक्खादीनमिन्द्रियानं। **पवत्तानुभावतो**ति तेसं तत्थ अत्थितानुभावतो। अयञ्हेत्थ अधिप्पायो – चक्खुसोतविञ्ञाणानं वत्थुभूतानि चक्खुसोतिन्द्रियानि तत्थ पवत्तन्तीति तेसं पवत्तिआनुभावतो चक्खुसोतविञ्ञाणानि पवत्तन्ति। सति च तेसं पवत्तियं वीथिचित्तुप्पादो नियतोति चक्खुविञ्ञाणादीनं विय सम्पटिच्छनसन्तीरणानम्पि तत्थ सम्भवो सिद्धोति।

५२३-४. अकामावचरधम्मेति कामावचरधम्मतो अञ्ञे महग्गतलोकुत्तरधम्मे। **नानुबन्धती**ति नानुवत्तति। **जनकं...पे॰... अनुबन्धती**ति यथा नाम गेहतो निक्खमित्वा बहि गन्तुकामो तरुणदारको अत्तनो जनकं पितरं वा अञ्ञं वा पितुसदिसं हितकामं ञातिं अङ्गुलियं गहेत्वा अनुबन्धति, न अञ्ञं राजपुरिसादिं, तथा एतम्पि भवङ्गारम्मणतो बहि निक्खमितुकामसभागताय अत्तनो जनकं पठमकुसलादिकं सदिसं वा दुतियकुसलादिकामावचरजवनमेव अनुबन्धति, न अञ्ञं महग्गतं लोकुत्तरन्ति अयमेत्थ अत्थो। **कुसलाकुसलादि**न्ति **आदि**-ग्गहणेन किरियाब्याकतं सङ्गण्हाति। **आनन्दाचरियो** पन **पट्ठाने** ''कुसलाकुसले निरुद्धे विपाको तदारम्मणता उप्पज्जती''ति (पट्ठा॰ ३.१.९८) विपाकधम्मधम्मानमेवानन्तरं तदारम्मणं वुत्तं। विप्फारवन्तञ्हि जवनं नावं विय नदीसोतो भवङ्गं अनुबन्धति, न पन छळङ्गुपेक्खावतो सन्तवुत्तिं किरियाजवनं पण्णपुटं विय नदीसोतोति किरियाजवनानन्तरं तदारम्मणं न इच्छति, **आचरियजोतिपाल**त्थेरादयो पन ''लब्भमानस्सपि केनचि अधिप्पायेन कत्थचि अवचनं दिस्सति, यथा तं धम्मसङ्गहे अकुसलनिद्देसे लब्भमानोपि अधिपति न वुत्तो, तस्मा यदि अब्याकतानन्तरम्पि तदारम्मणं वुच्चेय्य, तदा वोट्ठब्बनानन्तरम्पि तस्स पवत्तिं मञ्ञेय्युन्ति किरियाजवनानन्तरं तदारम्मणं न वुत्तं, न पन अलब्भनतो। यञ्चेत्थ पण्णपुटं निदस्सितं, तं निदस्सितब्बेन समानं न होति, नावापण्णपुटानञ्हि नदीसोतस्स आवट्टनं गति च विसदिसीति नावायं नदीसोतस्स अनुबन्धनं, पण्णपुटस्स अननुबन्धनञ्च युज्जति, इध पन किरियाजवनेतरजवनानं भवङ्गसोतस्स आवट्टनं गति च सदिसीति एतस्स अननुबन्धनं, इतरस्स अनुबन्धनञ्च न युज्जति, तस्मा विचारेतब्बमेव त''न्ति वदन्ति।

५२५-६. यथा चेतं महग्गतलोकुत्तरधम्मे नानुवत्तति, तथा यदा एते कामावचरधम्मापि महग्गतानुत्तरधम्मारम्मणा हुत्वा पवत्तन्ति, तदा तेपि नानुबन्धतीति आह **''कामावचरधम्मापी''**तिआदि। महग्गता-ग्गहणेन चेत्थ लोकुत्तरानम्पि सङ्गहो दट्ठब्बो। **ते चापी**ति **च**-सद्देन लोकुत्तरारम्मणानं गहणं। कस्मा नानुबन्धतीति आह **''परित्तारम्मणत्ता''**तिआदि। **परित्तारम्मणत्ता**ति हेट्ठा वुत्तनयेन कामावचरविपाकानं एकन्तेन परित्तारम्मणत्ता। **तथापरिचितत्ता**ति यथा जवनं, एवं अपरिचितत्ता। इदं वुत्तं होति – यथा हि सो पितरं, पितुसदिसं वा कञ्चि अनुबन्धन्तो तरुणदारको घरद्वारन्तरवीथिचतुक्कादिम्हि परिचितेयेव देसे अनुगच्छति, न अरञ्ञं वा रक्खसभूमिं वा गच्छन्तं, एवं कामावचरधम्मे अनुबन्धन्तम्पि परित्तम्हि परिचितेयेव देसे पवत्तमाने ते धम्मे अनुबन्धति, न महग्गतलोकुत्तरधम्मे आरब्भ पवत्तमानेपि।

५२७-३२. इदानि किं इमाय युत्तिकथाय, अट्ठकथापमाणतो चेतं गहेतब्बन्ति दस्सेन्तो आह ''**किं तेना**''तिआदि। **जवने**ति कामावचरजवने। **तदारम्मणचित्तानि** ''तदारम्मण''न्ति लद्धनामानि चित्तानि तदारम्मणभावं न गण्हन्ति, तदारम्मणभावेन न पवत्तन्तीति अत्थो। अथ वा नामगोत्तं आरब्भ जवने जविते **तदारम्मणं** तस्स जवनस्स आरम्मणं **न गण्हन्ति** न लब्भन्तीति अत्थो। **रूपारूपभवेसु वा**ति **वा**-सद्देन ''जवने जवितेपि तदारम्मणं न गण्हन्ती''ति आकड्ढति। **पण्णत्तिं आरब्भा**ति कामभवेपि पण्णत्तिं आरब्भ। **लक्खणारम्मणाया**ति अनिच्चादिलक्खणत्तयारम्मणाय, बलवविपस्सनायाति अत्थो। ''तीणि लक्खणानि, तिस्सो च पञ्ञत्तियो कुसलत्तिके न लब्भन्ती''ति **अट्ठकथाय** वुत्तत्ता तिण्णं लक्खणानं धम्मतो अभावेन तं आरब्भ पवत्ताय विपस्सनाय तदारम्मणानि न लब्भन्ति। **पट्ठाने** पन ''सेखा वा पुथुज्जना वा कुसलं अनिच्चतो दुक्खतो अनत्ततो विपस्सन्ति, कुसलाकुसले निरुद्धे विपाको तदारम्मणता उप्पज्जती''ति (पट्ठा० १.१.४०६) वचनतो खन्धारम्मणिकविपस्सनाय तदारम्मणं लब्भतीति दट्ठब्बं। **मिच्छत्तनियतेसू**ति ''कतमे धम्मा मिच्छत्तनियता? चत्तारो दिट्ठिगतसम्पयुत्तचित्तुप्पादा''ति (ध० स० १४२६) एवमागतेसु मिच्छागाहवसेन पवत्तेसु धम्मेसु जवनं हुत्वा जवितेसु। कस्मा पन तेसु जवितेसु तदारम्मणं न लब्भतीति? कामावचरविपाकानञ्हि नियतमिच्छादिट्ठि विय ''अत्ता ओच्छिज्जती''तिआदिना अत्तपरिकप्पनावसेन अप्पवत्तनतो नियतमिच्छादिट्ठिवसप्पवत्तेसु तेसु जवितेसु तदनन्तरं तदारम्मणानि न उप्पज्जन्ति, अनियतमिच्छादिट्ठिवसप्पवत्तेसु पन जवितेसु तदारम्मणं नुप्पज्जतीति नत्थि। अथ वा **मिच्छत्तनियतेसू**ति मिच्छाभावनियतसभावेसु तंविसयेसूति अत्थो। मिच्छत्तनियतधम्मानं धम्मसभावं अग्गहेत्वा मिच्छत्तनियतसभावस्सेव गहणतो, तस्स च विपाकानं अविभूतत्ता मिच्छत्तनियतसभावे आरब्भ तदारम्मणा न लब्भन्ति। **पि**-सद्देन सम्मत्तनियतेसुपीति सम्पिण्डेति, ''लोकुत्तरधम्मे आरब्भा''ति वा एतेन सिद्धत्ता न तेसं विसुं उद्धरणं कतं। अट्ठकथायं पन मिच्छत्तनियतसम्मत्तनियतानं अञ्ञमञ्ञपटिपक्खभावेन बलवभावतो तदारम्मणस्स अवत्थुभावदस्सनत्थं मिच्छत्तनियतानन्तरं सम्मत्तनियतापि उद्धटा। मिच्छत्तनियतसभावस्स विय पटिसम्भिदासभावस्सपि कामावचरविपाकानं अविभूतभावेन पटिसम्भिदाञाणानि आरब्भ जवने जविते तदारम्मणं न लब्भतीति आह ''**पटिसम्भिदाञाणानी**''तिआदि। **मनोद्वारेपी**ति न केवलं पञ्चद्वारेसुयेव, अथ खो मनोद्वारेपि। **सब्बेस**न्ति अहेतुकदुहेतुकादीनं सब्बेसं। **अनुपुब्बतो**ति हेट्ठा वुत्तअनुक्कमतो।

५३३. न विज्जतीति मनोद्वारस्स अप्पटिघभावेन न विज्जति। **भवङ्गतो**ति भवङ्गसन्तानतो, तस्स आरम्मणतो वा। **वुट्ठान**न्ति भवङ्गसन्ताने, तस्सारम्मणे वा सति तस्स वुट्ठानं।

५३५-६. सत्त सत्ताति एकेकस्स सत्त सत्ताति कत्वा। **पापपाका**ति अकुसलविपाका। ''द्वादसापुञ्ञचित्तान''न्ति वत्वा ''पापपाका''ति वचनं ''तत्रिदं सुगतस्स सुगतचीवरप्पमाण''न्तिआदीसु विय सञ्ञासद्दवसेन वुत्तं। एवं पवत्तियं अकुसलविपाकानं पवत्तिं दस्सेत्वा इदानि पटिसन्धियं दस्सेतुं ''**एकादसविधान**''न्तिआदि वुत्तं। उद्धच्चचेतनाय पवत्तिविपाकदानमत्तं विना पटिसन्धिदानाभावतो आह ''**हित्वा उद्धच्चमानस**''न्ति। किं पनेत्थ कारणं, अधिमोक्खविरहेन सब्बदुब्बलम्पि विचिकिच्छासहगतं पटिसन्धिं आकड्ढति, अधिमोक्खसभावतो ततो बलवतरम्पि उद्धच्चसहगतं नाकड्ढतीति? पटिसन्धिदानसभावाभावतो। ''बलवं आकड्ढति, दुब्बलं नाकड्ढती''ति हि अयं विचारणा पटिसन्धिदानसभावेसुयेव। यस्स पन पटिसन्धिदानसभावो एव नत्थि, न तस्स बलवभावो पटिसन्धिआकड्ढने कारणन्ति।

कथं पनेतं विञ्ञातब्बं ''उद्धच्चसहगतस्स पटिसन्धिदानसभावो नत्थी''ति? दस्सनेनपहातब्बेसु अनागतत्ता। तिविधा हि अकुसला दस्सनेनपहातब्बा, भावनायपहातब्बा, सिया दस्सनेनपहातब्बा सिया भावनायपहातब्बाति। तत्थ दिट्ठिसम्पयुत्तविचिकिच्छासहगतचित्तुप्पादा **दस्सनेनपहातब्बा** नाम। यथाह ''कतमे धम्मा दस्सनेनपहातब्बा? चत्तारो

दिट्ठिगतसम्पयुत्तचित्तुप्पादा विचिकिच्छासहगतो चित्तुप्पादो''ति (ध॰ स॰ १४०८)। ते हि पठमं निब्बानदस्सनतो ''दस्सन''न्ति लद्धनामेन सोतापत्तिमग्गेनेव पहातब्बत्ता ''दस्सनेनपहातब्बा''ति वुच्चन्ति। उद्धच्चसहगतचित्तुप्पादो **भावनायपहातब्बो** नाम। यथाह ''कतमे धम्मा भावनायपहातब्बा? उद्धच्चसहगतो चित्तुप्पादो''ति। सो हि अग्गमग्गेन पहातब्बत्ता ''भावनायपहातब्बो''ति वुत्तो। उपरिमग्गत्तयञ्हि पठममग्गेन दिट्ठस्मिंयेव भावनावसेन उप्पज्जति, न अदिट्ठपुब्बं किञ्चि पस्सति, तस्मा ''भावना''ति वुच्चति। दिट्ठिविप्पयुत्तदोमनस्ससहगतचित्तुप्पादा पन **सिया दस्सनेनपहातब्बा सिया भावनायपहातब्बा** नाम। यथाह ''चत्तारो दिट्ठिगतविप्पयुत्ता लोभसहगतचित्तुप्पादा द्वे दोमनस्ससहगतचित्तुप्पादा। इमे धम्मा सिया दस्सनेनपहातब्बा सिया भावनायपहातब्बा''ति (ध॰ स॰ १४०९)। ते हि अपायनिब्बत्तकावत्थाय पठममग्गेन, सेसावत्थाय उपरिमग्गेहि पहीयमानत्ता सिया दस्सनेनपहातब्बा सिया भावनायपहातब्बा नाम। तत्थ सिया दस्सनेनपहातब्बम्पि दस्सनेनपहातब्बसामञ्ञेन इध ''दस्सनेनपहातब्बा''त्वेव वोहरन्ति। यदि च उद्धच्चसहगतं पटिसन्धिं ददेय्य, तदा अकुसलपटिसन्धिया सुगतियं असम्भवतो अपायेस्वेव ददेय्य, अपायगमनीयञ्च एकन्तेन दस्सनेनपहातब्बा सिया, इतरथा अपायगमनीयस्स अप्पहीनत्ता सेखानं अपायुप्पत्ति आपज्जति, न च पनेतं युत्तं, ''चतूहपायेहि च विप्पमुत्तो (खु॰ पा॰ ६.११; सु॰ नि॰ २३४), अविनिपातधम्मो''तिआदिवचनेहि सह विरुज्झनतो, सति च पनेतस्स दस्सनेनपहातब्बभावे ''सिया दस्सनेनपहातब्बा''ति इमस्स विभङ्गे वत्तब्बं सिया, न च पनेतं वुत्तन्ति। अथ सिया ''अपायगमनीयो रागो दोसो मोहो तदेकट्ठा च किलेसा''ति एवं दस्सनेनपहातब्बेसु वुत्तत्ता उद्धच्चसहगतस्सापि तत्थ सङ्गहो सक्का कातुन्ति? तं न, तस्स नियामतो भावनायपहातब्बभावेन वुत्तत्ताति तस्मा दस्सनेनपहातब्बेसु अवचनमेव पटिसन्धिदानाभावं साधेतीति।

ननु च **पटिसम्भिदाविभङ्गे** –

> ''यस्मिं समये अकुसलं चित्तं उप्पन्नं होति उपेक्खासहगतं उद्धच्चसम्पयुत्तं, रूपारम्मणं वा…पे॰… धम्मारम्मणं वा यं यं वा पनारब्भ, तस्मिं समये फस्सो होति…पे॰… अविक्खेपो होति, इमे धम्मा अकुसला। इमेसु धम्मेसु ञाणं धम्मपटिसम्भिदा, तेसं विपाके ञाणं अत्थपटिसम्भिदा''ति (विभ॰ ७३१) –

एवं उद्धच्चसहगतचित्तुप्पादं उद्धरित्वा तस्स विपाकोपि उद्धटोति कथमस्स पटिसन्धिदानाभावो सम्पटिच्छितब्बोति? न इदं पटिसन्धिदानं सन्धाय उद्धटं, अथ खो पवत्तिविपाकं सन्धाय। **पट्ठाने** पन –

> ''सहजाता दस्सनेनपहातब्बा चेतना चित्तसमुट्ठानानं रूपानं कम्मपच्चयेन पच्चयो, नानक्खणिका दस्सनेनपहातब्बा चेतना विपाकानं खन्धानं कटत्ता च रूपानं कम्मपच्चयेन पच्चयो''ति (पट्ठा॰ २.८.८९) –

दस्सनेनपहातब्बचेतनाय एव सहजातनानक्खणिककम्मपच्चयभावं उद्धरित्वाव ''सहजाता भावनायपहातब्बा चेतना चित्तसमुट्ठानानं रूपानं कम्मपच्चयेन पच्चयो''ति भावनायपहातब्बचेतनाय सहजातकम्मपच्चयभावोव उद्धटो, न पन नानक्खणिककम्मपच्चयभावो। तथा **पच्चनीयनये**पि –

> ''दस्सनेनपहातब्बो धम्मो नेवदस्सनेननभावनायपहातब्बस्स धम्मस्स आरम्मणपच्चयेन पच्चयो, सहजात… उपनिस्सय…पे॰… पच्छाजात… कम्मपच्चयेन पच्चयो''ति (पट्ठा॰ २.८.९८) –

दस्सनेनपहातब्बस्सेव कम्मपच्चयभावं उद्धरित्वा –

> ''भावनायपहातब्बो धम्मो नेवदस्सनेननभावनायपहातब्बस्स धम्मस्स आरम्मणपच्चयेन पच्चयो, सहजात... उपनिस्सय... पच्छाजातपच्चयेन पच्चयो''ति (पट्ठा॰ २.८.९९) –

भावनायपहातब्बस्स धम्मस्स सहजातादिपच्चयभावोव वुत्तो, न पन कम्मपच्चयभावो, न च नानक्खणिककम्मपच्चयं विना पटिसन्धिआकड्ढनं अत्थि, तस्मा नत्थि तस्स सब्बथापि पटिसन्धिदानं। पवत्तिविपाकं पनस्स न सक्का निवारेतुं पटिसम्भिदाविभङ्गे उद्धच्चसहगतानम्पि विपाकस्स उद्धटत्ता, नानक्खणिककम्मपच्चयस्स च पटिसन्धिविपाकमेव सन्धाय अनुद्धटत्ता। एवञ्च पन कत्वा यदेके आचरिया वदन्ति ''उद्धच्चचेतना उभयविपाकम्पि न देति पट्ठाने नानक्खणिककम्मपच्चयस्स अनुद्धटत्ता''ति, तं तेसं अभिनिवेसमत्तमेवाति दट्ठब्बं।

यदि च ते वदेय्युं – यथा ''विपाकधम्मधम्मा''ति एत्थ विपाक-सद्देन विपाकारहता वुच्चति, एवं इधापि उद्धच्चसहगतानं विपाकारहतं सन्धाय ''तेसं विपाके ञाण''न्ति वुत्तं। यथा सद्धिन्द्रियविनिमुत्तस्स अधिमुच्चनट्ठस्स अभावेपि सद्धिन्द्रियस्स अधिमुच्चनसत्तिविसेसं गहेत्वा सद्धिन्द्रियधम्मो अधिमुच्चनट्ठो अत्थोति वुच्चति, एवमिधापि धम्मविनिमुत्तस्स विपाकारहभावस्स अभावेपि धम्मानमेव विपाकारहसामत्थियं गहेत्वा तस्स अत्थिभावो वुत्तो। यदि च ते पवत्तिविपाकं ददेय्युं, यथा –

> ''सुखाय वेदनाय सम्पयुत्तो धम्मो दुक्खाय वेदनाय सम्पयुत्तस्स धम्मस्स कम्मपच्चयेन पच्चयो, नानक्खणिका''ति (पट्ठा॰ १.२.५७) –

पवत्तिविपाकस्सपि वसेन नानक्खणिककम्मपच्चयो वुत्तो, एवमेत्थापि नानक्खणिककम्मपच्चयभावो वत्तब्बो सिया। न हि लब्भमानस्स अवचने कारणं अत्थीति तस्मा यथाधम्मसासने अवचनम्पि अभावमेव दीपेति। अपिच यदि उद्धच्चसहगतस्स पवत्तिविपाकदानं अधिप्पेतं सिया, तदा ''अनुपादिन्नुपादानियो धम्मो उपादिन्नुपादानियस्स धम्मस्स न कम्मपच्चयेन पच्चयो''ति पटिसेधो न कातब्बो सिया। न हि ठपेत्वा उद्धच्चं अञ्ञो कोचि अनुपादिन्नुपादानियो धम्मो उपादिन्नुपादानियस्स धम्मस्स पच्चयो भवितुं असमत्थो अत्थीति, तयिदमेतेसं अभिलापमत्तं। तथा हि यं ताव वुत्तं ''विपाकारहभावं गहेत्वा तेसं विपाकेति वुत्त''न्ति, तदेव तस्स विपाकसब्भावं दीपेति। न हि विपाकारहभावे सति अभिञ्ञादीनं विय तस्स अविपाकताय कारणं अत्थीति। यम्पि वुत्तं ''नानक्खणिककम्मपच्चयस्स अवचनं विपाकभावं दीपेती''ति, तम्पि न सुन्दरं, लब्भमानस्सापि कत्थचि केनचि अधिप्पायेन अवचनतो। तथा हि धम्मसङ्गणियं लब्भमानम्पि हदयवत्थु न वुत्तं। तस्मा यदि पवत्तिविपाकं सन्धाय नानक्खणिककम्मपच्चयभावो वुच्चेय्य, तदा पटिसन्धिविपाकदानम्पिस्स मञ्ञेय्युन्ति लब्भमानस्सपि पवत्तिविपाकस्स वसेन नानक्खणिककम्मपच्चयभावो न वुत्तोति। यं पन अनुपादिन्नुपादानियस्स उपादिन्नुपादानियं पति कम्मपच्चयपटिक्खेपवचनं, तं अभिञ्ञाकुसलादिके सन्धायाति न एत्तावता उद्धच्चसहगतस्स पवत्तिविपाकदानं सब्बथापि पटिक्खिपितुं सक्काति। यम्पि **अट्ठकथायं** ''यथा च अभिञ्ञाचेतना, एवमुद्धच्चचेतनापि 'सङ्खारपच्चया विञ्ञाण'न्ति एत्थ अपनेतब्बा''ति वुत्तं, तम्पि उद्धच्चचेतनाय तत्थ निद्दिसियमानाय यथा इतरा पटिसन्धिपवत्तिवसेन दुविधस्सपि विपाकविञ्ञाणस्स पच्चयो, एवमुद्धच्चचेतनापीति गण्हेय्युन्ति वुत्तं, न तस्स पवत्तिविपाकाभावतोति।

आचरियबुद्धमित्तादयो पन उद्धच्चसहगतं द्विधा विभजित्वा एकस्स उभयविपाकदानं, एकस्स सब्बथापि विपाकाभावं वण्णेन्ति। तेसञ्हि अयं विनिच्छयो – अत्थि उद्धच्चं भावनायपहातब्बम्पि, अत्थि नभावनायपहातब्बम्पि। तेसु भावनायपहातब्बं सेखसन्तानप्पवत्तं, इतरं पुथुज्जनसन्तानप्पवत्तं। फलदानञ्च पुथुज्जनसन्ताने पवत्तस्सेव, नेतरस्स।

